दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लचतुर्दशी
मार्गशीर्ष ०४ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-6 ■ अङ्क-27 | 1 | नवम्बर 23, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 CYBER CRIME- सामाजिकमाध्यमेषु सन्दिग्धचलच्चित्रेभ्यः सावधानाः भवन्तु, अप्रमाणितानि चलच्चित्राणि अग्रे मा प्रेषयन्तु।

4 मातृवियोगः जीवनस्य अपूरणीया क्षतिः- प्रो. बिहारीलालः शर्मा

9 विश्वप्रसिद्धस्य हरिहरक्षेत्र-सोनपुरमेलायाः मुख्यमन्त्रिणा सम्राट चौधरीमहोदयेन विधिवद् उद्घाटनम् कृतम्

नेपालदेशस्य प्रधानमन्त्री बालेन्द्रशाहः

द्विदिवसीय-भारतयात्रायाम् नवदिल्ल्यां संप्राप्तवान्



नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः गतदिवसे द्विदिवसीयभारतयात्रायै देहलीनगरम् संप्राप्तवान्। मार्चमासे पदभारग्रहणानन्तरम् एषा तस्य प्रथमा भारतयात्रा अस्ति। विमानस्थानके केन्द्रीयमन्त्री जितिनप्रसादः तस्य स्वागतं कृतवान्। नेपालस्य प्रधानमन्त्री सायंकाले विदेशमन्त्रिणा डॉ. एस्. जयशङ्करेण सह मिलितवान्। अद्य राष्ट्रपतिभवने नेपालस्य प्रधानमन्त्री औपचारिकरूपेण स्वागतं प्राप्स्यति। सः राजघट्टे पुष्पाञ्जलिं समर्प्य महात्मगान्धिने श्रद्धाञ्जलिं अर्पयिष्यति। सः राष्ट्रपतिना द्रौपदीमुर्मूवर्यया सह मिलिष्यति तथा च प्रधानमन्त्रिणा नरेन्द्रमोदिना सह द्विपक्षीयां वार्ता करिष्यति। द्विपक्षीयवार्तायाः समयावधौ उभौ नेतारौ भारत-नेपालयोः सम्बन्धानां समग्रसमीक्षां करिष्यतः तथा च परस्परहितसम्बद्धेषु क्षेत्रीयेषु अन्तर्राष्ट्रीयेषु च विषयेषु स्वविचारान् विनिमयं करिष्यतः। उभयोः प्रधानमन्त्रिणोः मध्ये अनेकासां पूर्णतां प्राप्तानां परियोजनानाम् आभासीयमाध्यमेन उद्घाटनं भविष्यति तथा च कतिपयानां नवीनपरियोजनानां शिलान्यासोऽपि भविष्यति। श्रीशाहः, प्रधानमन्त्रिणा नरेद्रमोदिना सह नेपालस्य जनकपुर-धाम्नः उत्तरप्रदेशस्य अयोध्यायाः च मध्ये नूतन-साप्ताहिक-रेलयानाय संयुक्तरूपेण हरितध्वजं प्रदर्शयिष्यति।

भारतीय-रेल-विभागेन नेपालदेशस्य जनकपुर-धाम्नः उत्तरप्रदेशस्य अयोध्यायाः इत्येतयोः मध्ये नूतन-साप्ताहिक-रेल-सेवा आरब्धा अस्ति। प्रधानमन्त्री नरेन्द्रमोदी, नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः च अद्य दृश्यश्रव्य-आभासीय-माध्यमेन उभयोः देशयोः मध्ये रेल-सेवायाः संयुक्तरूपेण ध्वजं प्रदर्श्य आरम्भं करिष्यतः। इयं सेवा रामायणपरम्परया सह सम्बद्धयोः गन्तव्यस्थानयोः मध्ये महत्त्वपूर्ण-रेलमार्ग-सम्पर्क स्थापयिष्यति-जनकपुर-धाम् माता सीतायाः जन्मस्थानम् अयोध्या भगवतः श्रीरामस्य जन्मस्थानम् च। अयं उपक्रमः उभयोः देशयोः यात्रिणां कृते एतयोः प्रमुख-धार्मिक-सांस्कृतिक केन्द्राणां कृते उन्नतसम्पर्क प्रदातुं शक्नोति तथा च तेषां सहभागी-सभ्यता-परम्परां सुदृढं करिष्यति।

सुभाषितम्

आदौ तु रमणीयानि मध्ये तु विरसानि च।
अन्ते वैरायमाणानि सङ्गतानि खलैः सह।।

भावार्थः- भावार्थः- दुष्ट और नीच व्यक्तियों की सङ्गति प्रारम्भ में आनन्ददायक होती है, मध्य में अरुचिकर और अन्ततः वैर (शत्रुता) में परिवर्तित हो जाती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकमण्डलः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्राणा, प्रचारणाः- जगदीश डाभी गुजरातम्, बृजेश कुमार पाण्डेय, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राधवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साबले महाराष्ट्रम्, ईदर शैरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

सम्पूर्णे बाङ्ग्लादेशे वस्त्र-उद्योगे श्रमिक-अशांतिः अन्ववर्तत्



सम्पूर्णे बाङ्ग्लादेशे वस्त्र-उद्योगे श्रमिक-अशांतिः अन्ववर्तत्। स्थानीय-वार्ता-माध्यमानां प्रतिवेदनानुसारं, सावर-अशुलिया-नगरयोः एकविंशति समवायाः पिहिताः सन्ति। कर्मकराः अन्यैः विषयैः सह न्यूनतमं मासिकं वेतनं त्रिंशत्सहस्रं टक्का इति याचयन्तः सन्ति। अत्रान्तरे, गाजीपुर-नगरस्य श्रीपुर्-क्षेत्रे नूतनानि प्रदर्शनानि प्रारब्धानि, यत्र वस्त्र-कर्मकराः ढाका-मैमनसिंह-राजमार्ग अवरुद्धं प्रयतन्ते स्म। केचन कर्मकराः विधि-प्रवर्तन-कर्मचारिणां उपरि इष्टिकाः प्रस्तराः च क्षिपितवन्तः। श्रमिकनेतारः सर्वकारेण सह संवादस्य माध्यमेन विवादस्य निराकरणं कर्तुं, पिहितानां संवायानां पुनः उद्घाटनं सुकरं कर्तुं च आग्रहं कृतवन्तः।

राज्यसभासदस्यः रामराव सखाराम वडकुटेवर्यः द्विसप्ततिः वयसि दिवङ्गतः



राज्यसभा सदस्यः रामराव सखाराम वडकुटे वर्यः नवदेहली-नगरस्य अखिलभारतीय आयुर्विज्ञान संस्थाने उपचाराधीनः द्विसप्ततिः वयसि दिवङ्गतः। हृदयाघातानन्तरं सः चिकित्सालये प्रविष्टः। रामराव वडकुटे वर्यः मराठवाडा-प्रदेशस्य प्रमुखः राजनैतिज्ञः आसीत्, धनगर-समुदायस्य विषयेषु तस्य कार्यस्य कृते सः व्यापकरूपेण मान्यतां प्राप्नोत्। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्र मोदी च राज्यसभायाः सदस्यस्य रामराव वडकुटे वर्यस्य निधने शोकं प्रकटितवन्तः ।

बुल्गारिया देशस्य विदेशमन्त्री डा. वेलिस्लावा पेट्रोवा-चमोवावर्या त्रिदिवसीय-भारतयात्रां समापितवती



बुल्गारिया देशस्य विदेशमन्त्री डा. वेलिस्लावा पेट्रोवा-चमोवावर्या त्रिदिवसीय-भारतयात्रां समापितवती। विदेशमन्त्री डा. एस्, जयशङ्करः नवदेहली-नगरे डा. वेलिस्लावा पेट्रोवा-चमोवा इत्यनया सह प्रतिनिधिस्तरीय वार्ता कृतवान्। विदेशमन्त्रालयः अवदत् यत् उभौ सम्पूर्णस्य द्वैपाक्षिकसम्बन्धानां समीक्षाम् अकुर्वताम्। व्यापार-निवेशः, अवसंरचना-विकासः, विज्ञान-प्रौद्योगिकी, कृत्रिम बुद्धिमत्ता, अन्तरिक्षं, रक्षा, शिक्षा, संस्कृतिः, गतिशीलतादिषु क्षेत्रेषु सहकारं इतोऽपि सुदृढं कर्तुं प्रतिबद्धतां दृढीकृतवन्तौ।

गृहमन्त्री अमितशाहः अकथयत् यत् अरुणाचल-प्रदेशस्य कृषकाणां प्रत्यक्षतया कृषि- उत्पादानां क्रयणाय सेना, भारत-तिब्बत-सीमा- आरक्षकाः च सूचिताः सन्ति



केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः अवदत् यत्, अरुणाचलप्रदेशस्य कृषकाणां प्रत्यक्षतया कृषि-उत्पादानां क्रयणाय सेनायाः, भारत-तिब्बत-सीमा-आरक्षकाणां कृते च सूचना दत्ता अस्ति। सः अवदत् यत् एतत् उपक्रमं सुरक्षासेनायाः कृते गुणवत्तायुक्तानां उत्पादानां उपलब्धता सुनिश्चितं कुर्वन् स्थानीय-कृषकाणां कृते उत्तम अवसरान्, वित्तीय लाभान् च प्रदातुं शक्नोति। ईटानगरस्य दोरजी-खाण्डू-राज्य-सम्मेलनकेन्द्रे अरुणाचलप्रदेश-सहकारिता-दूरदृष्टिपत्र-विंशतिः सप्तविंशतिः सम्मेलनम् अभिसंबोधयन् श्रीशाहः अवदत् यत् एतादृशाः उपक्रमाः सुरक्षासेनायाः स्थानीयजनानां च मध्ये विश्वासस्य सहकारस्य च सम्बन्धम् अपि सुदृढं करिष्यन्ति। आत्मनिर्भरतायाः सुदृढीकरणस्य आवश्यकतायाः उपरि बलं प्रददता, मन्त्रिणा उक्तं यत् राज्यं देशं च स्वावलंबन् योजना इत्यादीनाम् उपक्रमाणां सुदृढीकरणस्य दिशि अग्रे गच्छन्तु । सः राज्यसर्वकारेण प्रत्येकस्य नागरिकस्य कृते आजिविका अवसरान्, विकास-लाभं सुनिश्चेतुम् आग्रहम् अकरोत्। श्रीशाहः अवधानं दत्तवान् यत् जनानां उन्नतजीवने कल्याणे च विकासः प्रतिबिम्बितः भवेत्। राज्ये विशेषतः मत्स्यपालनं प्रोत्साहनाय, मत्स्योत्पादनं वर्धनाय च उद्यमिनः, कृषकाः, मत्स्य-जीविनः च सर्वकारीय-उपक्रमैः सह निकटतया सम्बद्धाः भवेयुः इत्यपि सः अवधानं दत्तवान्। केन्द्रीयमन्त्री राज्ये मूलसौकर्याणां विकासस्य विषये अपि अवधानं दत्वा अवदत् यत् अरुणाचलप्रदेशाय वित्तीयसाहाय्यं वर्धितम् अस्ति, येन विविधक्षेत्रेषु प्रगतिः साधिता अस्ति। श्रीशाहः ईटानगरस्य समीपे होलोङ्गी इत्यत्र राष्ट्रिय-आपद्-प्रतिक्रिया-बलस्य द्वादशमं बटालियन् इत्यस्य परिसरस्य उद्घाटनम् अकरोत्।

CYBER CRIME- सामाजिकमाध्यमेषु सन्दिग्धचलच्चित्रेभ्यः सावधानाः भवन्तु, अप्रमाणितानि चलच्चित्राणि अग्रे मा प्रेषयन्तु।

साइबर-अपराधिनः कृत्रिमबुद्धिप्रौद्योगिक्याः दुरुपयोगेन मिथ्याचलच्चित्राणि निर्मान्ति



हिमसंस्कृतवार्ताः- शिमला।

प्रौद्योगिक्याः वर्धमानेन उपयोगेन सह सङ्गणकीय- अपराधानाम् उपायाः अपि निरन्तरं परिवर्तन्ते। अधुना कृत्रिमबुद्धिप्रौद्योगिक्याः अन्तर्गतायाः डीपफेक- प्रविधेः दुरुपयोगेन एतादृशानि कृत्रिमचलच्चित्राणि निर्मातुं शक्यन्ते, यानि दृष्ट्या सर्वथा वास्तविकानि इव भासन्ते। एतेषां चलच्चित्राणां माध्यमेन कस्यचित् व्यक्तेः स्वरः, मुखाकृतिः, कथनं च परिवर्तयितुं शक्यते। परिणामतः सामान्यजनानां कृते वास्तविकस्य कृत्रिमस्य च भेदः ज्ञातुं कठिनं भवति।

अस्मिन् विषये गाम्भीर्यं दृष्ट्वा आरक्षिविभागस्य सङ्गणकीय-अपराधान्वेषणप्रकोष्ठेन जनसामान्यं डीपफेक्-प्रविधिना निर्मितानां मिथ्याचलच्चित्राणां विषये सतर्कं भवितुं परामर्शः प्रदत्तः। प्रकोष्ठेन जनानाम् आग्रहः कृतः यत् सामाजिकमाध्यमेषु प्राप्यमाणेषु सन्दिग्धचलच्चित्रेषु तत्कालं विश्वासं न कुर्वन्तु। यदि किमपि चलच्चित्रम् असामान्यं, विस्मयजनकं वा दृश्यते अथवा कस्मिंश्चित् व्यक्तिविषये सन्देहास्पदं कथनं प्रसारयति, तर्हि तत् अन्येभ्यः प्रेषयितुं पूर्वं तस्य सत्यतायाः सम्यक् परीक्षणं कुर्वन्तु।

अप्रमाणितस्य चलच्चित्रस्य प्रसारणेन मिथ्यासूचनाः शीघ्रं प्रसर्तुं शक्नुवन्ति। एतेन सम्बन्धितव्यक्तेः प्रतिष्ठायाः हानिः भवितुं शक्नोति, जनाः च आर्थिकप्रवञ्चनायाः प्रवञ्चिताः भवितुम् अर्हन्ति।

आरक्षिविभागेन जनान् परामृष्टं यत् चलच्चित्रेषु दृश्यन्ते मुखस्य भावभङ्गयः, स्वरः, ओष्ठचालनस्य स्वरस्य च सामञ्जस्यं तथा चलच्चित्रस्य अस्वाभाविकगुणवत्ता इत्यादिषु सङ्केतेषु विशेषतया ध्यानं दद्युः। तथापि आधुनिक-डीपफेक्-प्रविधिः अत्यन्तं विकसिताऽस्ति। अतः केवलं दृष्टिमात्रेण कृत्रिमचलच्चित्राणां परिचयः सर्वदा सम्भवो न भवति। तस्मात् महत्त्वपूर्णस्य अथवा विवादास्पदस्य चलच्चित्रस्य सत्यतां अन्यैः विश्वसनीयैः स्रोतैः अपि परीक्षेत।

आरक्षिविभागेन जनसामान्यं पुनः समाहूतं यत् सामाजिकमाध्यमेषु प्राप्यमाणां प्रत्येकां सूचनां सत्यां मत्वा न विश्वसेयुः। कस्याश्चिदपि सन्दिग्धसामग्र्याः प्रसारणात् पूर्वं तस्याः प्रामाणिकतायाः पुष्टिरेव करणीयाऽस्ति।

प्रवञ्चनया पीडिताः चेत् तत्कालं परिवेदनं कुर्वन्तु

सङ्गणकीय- अपराधान्वेषणप्रकोष्ठस्य परामर्शसूचनायां जनान् सूचितं यत् यदि केचन सङ्गणकीयप्रवञ्चनायाः अथवा अन्यस्य कस्यचिद् सङ्गणकीयापराधस्य प्रवञ्चिता भवन्ति, तर्हि विलम्बं विना तत्कालं सम्बन्धितविभागे परिवेदनं समर्पयेयुः। सङ्गणकीयापराधस्य सूचना १९३० इति दूरभाषसहायतासङ्ख्यायां प्रदातुं शक्यते। तदतिरिक्तम् अन्तर्जालमाध्यमेन निर्धारिते जालस्थले अपि परिवेदनं पञ्जीकर्तुं शक्यते। समये एव परिवेदनं समर्पय प्रवञ्चनया अपहृतां धनराशिम् अवरोद्धुं तथा प्रकरणस्य अन्वेषणे साहाय्यं कर्तुं शक्यते।

विज्ञानक्षेत्रे कन्नौजजनपदस्य उत्कृष्टं प्रदर्शनम्, नव प्रतिभागिनः मण्डलस्तरीयप्रतियोगितायै चयनिताः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, कन्नौजम्। जनपदे आयोजितायां चतुःपञ्चाशत्तमायां जनपदस्तरीयायां बालविज्ञानप्रदर्शन्यां मूलभूतशिक्षाविभागस्य छात्रछात्राभिः उत्कृष्टं प्रदर्शनं कृतम्। अस्यां प्रतियोगितायां विद्यार्थिभिः चत्वारः प्रथमस्थानानि, त्रीणि द्वितीयस्थानानि च प्राप्तानि। अध्यापकवर्गेऽपि एकं प्रथमस्थानम्, एकं द्वितीयस्थानं च प्राप्तम्। एवं समग्ररूपेण नव विजेतृप्रतिभागिनः मण्डलस्तरीयप्रतियोगितायै चयनिताः सन्ति।



प्रदेशस्य ग्रामसभासु कर्गदपत्रीय-कार्यविधिः समाप्ता, पञ्चायतानां सभानां सम्पूर्णं विवरणम् अधुना अन्तर्जालमाध्यमेन अङ्कितं भविष्यति

अधुना अङ्कीय-अभिलेखनम् अनिवार्यम्



हिमसंस्कृतवार्ताः- शिमला।

प्रदेशस्य पञ्चायतीराज-व्यवस्था अधुना पूर्णतया अङ्कीय-अभिलेखनस्य दिशि अग्रसरति। पञ्चायतेषु आयोज्यमानानां सभानां कार्यविधिः अधुना केवलं पञ्जिकासु कर्गदपत्रेषु च अङ्कयित्वा सुरक्षितां स्थापयितुं न शक्यते। सर्वकारेण ग्रामसभातः आरभ्य जिलापरिषदः यावत् प्रत्येकस्याः सभायाः कार्यविधिः अङ्कीयमञ्चे अभिलिखितुं व्यवस्था कार्यान्विता अस्ति। अस्याः अन्तर्गतं सभायां सम्पन्ना कार्यविधिः, स्वीकृताः निर्णयाः च पञ्चायत-कार्यविधि- प्रबन्धन- प्रणाल्याम् अभिलेखनीयाः भविष्यन्ति।

पञ्चायतीराज-विभागेन निर्गतायाः अधिसूचनायाः अनुसारम् एषा व्यवस्था नवम्बरमासस्य १० दिनाङ्कात् प्रभाविणी अभवत्। सर्वकारेण हिमाचलप्रदेश- पञ्चायतीराजस्य (सामान्य) नियमाः, १९९७ इत्येषाम् अन्तर्गतं एषा व्यवस्था कार्यान्विता।

अस्याः कृते विभागेन मानक-सञ्चालन-प्रक्रिया (एस.ओ.पी.) अपि निर्धारिता अस्ति, यस्याः अनुसारं पञ्चायतैः सभानां कार्यविधिः अभिलेखनीया भविष्यति। ग्रामसभायाः, ग्रामपञ्चायतस्य, पञ्चायतसमितेः तथा जिलापरिषदः सभानां कार्यविधिः निर्धारिते प्रारूपे अन्तर्जालमाध्यमेन अभिलिख्य ततः अङ्कीयरीत्या प्रमाणिता करणीया। अनेन कस्याश्चित् सभायाः निर्णयः, प्रस्तावः अथवा कार्यविधिः भविष्ये आवश्यकतायाम् अङ्कीयमाध्यमेन उपलब्धा भविष्यति।

ग्रामपञ्चायतस्तरे पञ्चायतसचिवाय कार्यविधि-प्रणाल्यां प्रवेशयितुम्, अङ्कीयप्रमाणीकरणं सुनिश्चितं कर्तुं दायित्वं प्रदत्तम् अस्ति। पञ्चायतसमितेः स्तरे मुख्यकार्यकारी-अधिकारी, जिलापरिषदः स्तरे जिलापरिषदः सचिवः इदं सुनिश्चितं करिष्यतः यत् सभायाः कार्यविधिः निर्धारितसमयसीमायाः अन्तः अन्तर्जालमाध्यमेन अभिलिखिता अङ्कीयरीत्या प्रमाणिता च भवेत्। नियमानुसारम् अन्ये अधिकृताः अधिकारिणः अपि एतां प्रक्रियां सम्पादयितुं शक्नुवन्ति।

मानक- सञ्चालन-प्रक्रियानियमाणां पालनम् अनिवार्यम्

विभागेन स्पष्टं कृतं यत् केवलं सभायाः कार्यविधिः अन्तर्जालमाध्यमेन स्थापनमात्रेण पर्याप्तं न भविष्यति। सम्पूर्णायाः प्रक्रियायाः कृते निर्धारितायाः मानक-सञ्चालन-प्रक्रियायाः अर्थात् एस. ओ. पी. नियमाणां पालनम् अनिवार्यं भविष्यति। अस्यामेव एस.ओ.पी.-प्रक्रियायां कार्यविधि-अभिलेखनस्य, अपलोड-करणस्य तथा अङ्कीय- प्रमाणीकरणस्य विधिः समयसीमा च निर्धारिता अस्ति

हिमाचलप्रदेशः- द्विचक्रिकावाहनानां चालकानां पुरातनम् अभिलेखम् अन्वेषयिष्यति आरक्षिदलम्

अभ्यासवशात् नियमभङ्गं कुर्वतां चालकानाम् अनुज्ञापत्राणि (लाइसेंस) निरस्तानि भविष्यन्ति



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशे यातायात-नियमानाम् अवहेलनां कुर्वतां द्विचक्रिकावाहन-चालकानाम् अधुना आरक्षिदलम् (पुलिस-बलं) पुरातनम् अभिलेखं (रिकॉर्ड) सूक्ष्मतया अन्वेषयिष्यति। अभ्यासवशात् नियमभङ्गं कुर्वतां चालकानां वाहनचालन-अनुज्ञापत्राणि निलम्बितानि अथवा निरस्तानि कारयितुं प्रकरणानि सम्बद्धप्राधिकरणं प्रति प्रेषयिष्यन्ते। आरक्षि-मुख्यालयेन सर्वेषां मण्डलानां आरक्षि-अधीक्षकेभ्यः समग्रप्रदेशे विशेष-अन्वेषणाभियानं चालयित्वा कठोरं कार्याचरणं कर्तुं निर्देशाः प्रदत्ताः सन्ति।

अभियानस्य अन्तराले आरक्षिदलस्य विशेषं ध्यानं तीव्रगत्या वाहनं चालयित्वा प्राणान् सङ्कटे स्थापयतां यूनाम् उपरि स्थास्यति। निर्धारित-गतिसीमायाः अधिकवेगेन गच्छतां, अशुद्धरीत्या अतिक्रमणं कुर्वतां, शिरस्त्राणं (हेल्मेट) विना वाहनं चालयतां, सार्वजनिकमार्गेषु साहसिकक्रीडाः (स्टण्ट) कुर्वतां चालकानां परिचयं कृत्वा कार्याचरणं भविष्यति। ध्वनिप्रदूषणं प्रसारयतां परिवर्तित- ध्वनिरोधकयन्त्राणां (मॉडिफाइड साइलेन्सर) योजकानाम् उपरि अपि कठोरता विधास्यते।

प्रदेशस्य आरक्षि-महानिदेशकः अशोकतिवारी सूचितवान् यद् अस्य अभियानस्य मुख्यः उद्देश्यः केवलं दण्डपत्रं कर्तनं नास्ति, अपि तु मार्गदुर्घटनासु अङ्कुशं स्थापयितुम् अस्ति। सहैव द्विचक्रिकावाहन-चालकेषु यातायात-नियमान् प्रति उत्तरदायित्वं वर्धयितुमपि इदं प्रयासं क्रियते।

अप्राप्तवयस्केभ्यः वाहनदाने अभिभावकानाम् उत्तरदायित्वम् आरक्षि-मुख्यालयेन अप्राप्तवयस्कानां वाहनचालनस्य प्रकरणान्यपि विशेष- अभियाने समाविष्टानि सन्ति। यदि अभिभावकाः स्वकीयेभ्यः अप्राप्तवयस्क-सन्ततिभ्यः द्विचक्रिकावाहनं (बाइक अथवा स्कूटी) चालयितुं यच्छन्ति, तर्हि तेषां विरुद्धमपि नियमानुसारं कार्याचरणं करिष्यते। मोटरवाहन-अधिनियमस्य अन्तर्गततया एतादृशेषु प्रकरणेषु वाहनस्वामिनः अभिभावकस्य च उत्तरदायित्वं निर्धारयितुं प्रावधानं विद्यते।

मण्डलस्तरीया प्रतियोगिता कानपुरनगरे जवाहरनगरे स्थिते ओंकारेश्वर-सरस्वती- विद्यामन्दिर-अन्तर्विद्यालये आयोजयिष्यते



प्रतियोगितायां विद्यार्थिभिः गणितीय-प्रतिरूपनिर्माणं, गणनात्मकचिन्तनं च, हरितशक्तिः, पर्यावरणसंरक्षणं च, आपदाप्रबन्धनं कृत्रिमबुद्धिमत्ता च, ग्रामीणपरिवर्तनाय विज्ञानं, स्वास्थ्यं स्वच्छता च इत्यादिषु विषयेषु स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृतम्। अध्यापकवर्गे मोहम्मद् आकिलः, दीपिका सोनकरवर्या अपि स्थानं प्राप्य जनपदस्य गौरवं वर्धितवन्तौ।

उत्तरप्रदेशस्य मूलभूतशिक्षाविभागः छात्रेषु शिक्षकेषु च वैज्ञानिकदृष्टिकोणस्य, नवाचारस्य, सृजनात्मकप्रतिभायाश्च विकासाय निरन्तरं प्रयत्नशीलः अस्ति। विद्यार्थिनः शिक्षकांश्च उत्कृष्टोपलब्धीनां प्राप्तये प्रेरयितुं विभागः प्रतिबद्धतया कार्यं कुर्वन् अस्ति।

यदा विपक्षनेता मार्गस्य गुणवत्तायाः प्रशंसाम् अकरोत्, तदा विक्रमादित्यसिंहः अवदत्- कार्यम् एतादृशं भवेत् यत् विरोधिनः अपि प्रशंसां कुर्वन्तु

हिमसंस्कृतवार्ता- शिमला।

राजनीतिक्षेत्रे सत्तापक्षस्य विपक्षस्य च मध्ये प्रायः आरोप- प्रत्यारोपाणां क्रमः प्रचलति। विकासकार्याणां विषये अपि उभौ पक्षौ स्वस्वोपलब्धीनां वर्णनं कुर्वतः परस्परं च प्रश्नान् उत्थापयतः। किन्तु यदा विपक्षतः कस्यचित् कार्यस्य प्रशंसा श्रूयते, तदा सत्तापक्षाय तत् राजनैतिकदृष्ट्या महत्त्वपूर्णः अवसरः भवति। हिमाचलप्रदेशस्य लोकनिर्माणमन्त्री विक्रमादित्यसिंहस्य साम्प्रतिकी सामाजिकमाध्यमेषु प्रकाशिता टिप्पणी एतादृशेन राजनैतिकसन्देशेन सह चर्चायाः विषयः जाता। मन्त्रिणा विक्रमादित्यसिंहेन भारतीयजनतापक्षस्य प्रदेशाध्यक्षस्य डॉ. राजीवबिन्दलस्य मार्गनिर्माणस्य गुणवत्ताविषयिणीं प्रशंसाम् स्वकीयेन विशिष्टेन शैलीविन्यासेन सामाजिकमाध्यमेषु प्रस्तुतम्। स्वकीयया टिप्पण्या तेन स्पष्टः सन्देशः प्रदत्तः यत् कार्यम् एतादृशं भवेत्, येन विरोधिनः अपि तस्य प्रशंसां कर्तुं बाध्याः भवेयुः। यदा कर्म स्वयमेव वदति, तदा विरोधस्वराः अपि प्रशंसास्वरेषु परिणमन्ते।'

विक्रमादित्यसिंहेन स्वकीयायां टिप्पण्यां लिखितं यत् वायोः दिशां परिवर्तयितुं केवलं वचनानि पर्याप्तानि न भवन्ति। कार्यम् एतादृशं करणीयं यत् विपक्षः अपि प्रशंसां कर्तुं बाध्यः भवेत् तथा परिश्रम एव सर्वश्रेष्ठा परिचितिः भवेत्। डॉ. राजीवबिन्दलस्य उल्लेखं कुर्वन् तेन कथितं यत् यदा कार्यम् एतावद् उत्कृष्टं भवति यत् विपक्षस्य प्रदेशाध्यक्षः स्वयमेव गुणवत्तापरीक्षणार्थं कार्यक्षेत्रे अवतीर्य मार्गाणां गुणवत्तायाः प्रशंसां करोति, तदा अवगन्तव्यं यत् विकासस्य गतिः सम्यग्दिशि प्रवर्तते।



मन्त्रिणा अग्रे लिखितं यत् यदा कर्म स्वयमेव स्वकीयां गुणवत्तां प्रकाशयति, तदा विरोधस्य स्वराः अपि प्रशंसायाः स्वरूपं धारयन्ति। तस्य एतस्याः टिप्पण्याः राजनैतिकसन्देशरूपेण व्याख्या क्रियते। अस्मिन् मार्गनिर्माणस्य गुणवत्ता तथा विपक्षस्य प्रतिक्रिया इत्युभे विषये एकत्र संयोजिते स्तः।

विपक्षस्य प्रशंसायाः राजनैतिक-सन्देशरूपेण प्रस्तुतीकरणम्

विक्रमादित्यसिंहस्य टिप्पण्याः प्रमुखः राजनैतिकसन्देशः अयमेव यत् विकासकार्याणां गुणवत्ता केवलं सर्वकारस्य अथनैः एव न, अपितु विपक्षिदलानां प्रतिक्रियाभिः अपि ज्ञातुं शक्यते। भारतीयजनतापक्षस्य प्रदेशाध्यक्षस्य डॉ. राजीवबिन्दलस्य मार्गगुणवत्ताविषयिणीं प्रशंसां मन्त्रिणा स्वकीयकार्यस्य पक्षे सकारात्मकप्रतिक्रियारूपेण प्रस्तुतम्।

स्वकीयया टिप्पण्या तेन एषः सङ्केतः प्रदत्तः यत् विकासकार्येषु राजनैतिकविरोधात् परं गत्वा कार्यस्य गुणवत्तायै महत्त्वं प्रदातव्यम्।

सामाजिकमाध्यमेषु राजनैतिक-संवादस्य नूतनः प्रकारः

राजनैतिकनेतृणां सामाजिकमाध्यमेषु प्रकाशिताः टिप्पण्यः अधुना केवलं वक्तव्यप्रकाशनस्य माध्यमं न सन्ति, अपि तु राजनैतिकविमर्शस्य तथा स्वकीयोपलब्धीनां जनसामान्यं प्रति सम्प्रेषणस्य महत्त्वपूर्णं मञ्चम् अपि अभवन्। विक्रमादित्यसिंहस्य अस्यां टिप्पण्याम् अपि विकासः, मार्गनिर्माणस्य गुणवत्ता तथा विपक्षस्य प्रतिक्रिया इत्येते विषयाः एकत्र संयोज्य राजनैतिकसन्देशः प्रदत्तः। अस्याः टिप्पण्याः वैशिष्ट्यम् इदमेव यत् अत्र प्रत्यक्षारोपाणां स्थाने विपक्षस्य प्रशंसामेव आधारं कृत्वा व्यङ्ग्यात्मकशैल्या राजनैतिकं प्रत्युत्तरं प्रदत्तम्।

मातृवियोगः जीवनस्य अपूरणीया क्षतिः- प्रो. बिहारीलाल: शर्मा

उत्तरप्रदेशस्य माननीयमुख्यमन्त्रिणः श्रीयोगी आदित्यनाथस्य पूजनीयायाः मातुः निधनावसरे भावपूर्णा श्रद्धाञ्जलिः शोकसंवेदना च



हिमसंस्कृतवार्ताः- वाराणसी।

उत्तरप्रदेशस्य मुख्यमन्त्रिणः श्रीयोगी आदित्यनाथस्य पूजनीयायाः मातुः श्रीमतीसावित्रीदेव्याः निधनस्य वार्ता अत्यन्तं दुःखदायिनी हृदयविदारिणी च अस्ति। वन्दनीयायाः मातुः निधनात् माननीयमुख्यमन्त्रिणा तस्य समग्रेण परिवारेण च या अपूरणीया क्षतिः अनुभूता, तस्याः प्रति अहं स्वां गहनां शोकसंवेदनाम् आत्मीयां सहानुभूतिं च प्रकटयामि। मातृवियोगः जीवनस्य तासु गहनतमासु वेदनासु अन्यतमः अस्ति, यस्याः अनुभूतिं शब्दैः अभिव्यक्तुं कठिनम्। माता केवलं जन्मदात्री एव न भवति, अपितु सा सन्ततेः अस्तित्वस्य आधारशिला, संस्काराणां प्रथमप्रेरणास्रोतः, स्नेहस्य वात्सल्यस्य च अनन्तधारा तथा जीवनपथः मौनपथप्रदर्शिका च भवति। तस्याः त्यागः, तपस्या, ममता, आशीर्वादश्च सन्ततेः व्यक्तित्वे एवं समाहिताः भवन्ति यत् भौतिकसान्निध्यस्य समाप्तावपि तस्याः चेतना संस्काराश्च सन्ततेः अन्तः निरन्तरं स्पन्दन्ते। वस्तुतः माता स्वसंस्कारैः, सङ्कल्पैः, जीवनमूल्यैश्च सन्ततेः अन्तः सदैव जीवन्ती तिष्ठति। सा सन्ततेः हृदयस्पन्दनेषु, विचारेषु, चरित्रे, सत्कर्मसु च स्वामुपस्थितिं स्थापयति। सन्ततिः एव मातुः संस्काराणां संवाहिका, तस्याः स्वप्नानाम् उत्तराधिकारिणी तथा जीवनादर्शानां यथार्थप्रतिनिधिः भवति। यदा सन्ततिः सत्यस्य, धर्मस्य, न्यायस्य, लोकमङ्गलस्य, कर्तव्यनिष्ठायाश्च मार्गे सञ्चरन्ती मातुः आकाङ्क्षाः, सङ्कल्पान्, आदर्शांश्च स्वाचरणेन कर्मभिश्च साकारयति, तदा मातुः चेतना तस्याः जीवनमूल्यानि च चिरन्तनरूपेण जीवन्ति भवन्ति। अस्मिन् दृष्टिकोणे सन्ततेः श्रेष्ठं चरित्रम्, तस्याः लोककल्याणकारिणः कार्याः तथा समाजं प्रति प्रतिबद्धता एव मातुः संस्काराणां वास्तविकं साफल्यं तस्यै च सत्या श्रद्धाञ्जलिः भवति। माननीयमुख्यमन्त्रिणः श्रीयोगी आदित्यनाथस्य कृते इयं मातृवियोगस्य वेला अत्यन्तं भावनात्मिका पीडादायिनी च अस्ति। अस्मिन् दुःखदावसरे सम्पूर्णानन्द- संस्कृत- विश्वविद्यालय- परिवारस्य प्रत्येकस्य सदस्यस्य हृदयतः एषा कामना अस्ति यत् पूजनीयमातुः स्नेहः, तपस्या, संस्काराः, जीवनमूल्यानि च तस्मै अक्षयम् आत्मिकबलं प्रददतु। तया प्रदत्ता जीवनदृष्टिः संस्काराश्च माननीयमुख्यमन्त्रिणः सत्यनिष्ठायाः, लोकसेवायाः, समाजं प्रति दायित्वबोधस्य च निरन्तरं प्रेरणास्रोतः भवन्तु।

अस्मिन् दुःखपूर्णे समये अहं माननीयमुख्यमन्त्रिणं श्रीयोगी आदित्यनाथं तस्य समग्रं शोकसन्तप्तं परिवारं च प्रति स्वां गहनां संवेदनाम् आत्मीयां सहानुभूतिं च प्रकटयामि। काश्याः अस्याः पुण्यायाः आध्यात्मिक्याश्च धरायाः आराध्ये श्रीकाशीविश्वनाथे भगवति श्रीहरिविष्णौ च प्रार्थये यत् तौ दिवङ्गतायै पुण्यात्मने स्वश्रीचरणयोः स्थानं सद्गतिं च प्रदद्यातां माननीयमुख्यमन्त्रिणे तस्य परिवाराय च अस्याम् अपूरणीयक्षतौ सोढुं शक्तिं, धैर्यं, आत्मिकसम्बलं च प्रदद्याताम्।

पूजनीयमातुः प्रति विनम्रान् श्रद्धासुमनः समर्पयन् सम्पूर्णानन्द- संस्कृत- विश्वविद्यालय- परिवारः माननीयमुख्यमन्त्रिणं श्रीयोगी आदित्यनाथं तस्य समग्रं परिवारं च प्रति स्वां भावपूर्णां शोकसंवेदनां प्रकटयति।

मुंगेलीमण्डलस्य हथनीकलाग्रामे सप्तदिवसीय- राज्यस्तरीयस्य संस्कृतशिक्षक- व्याख्यातृप्रशिक्षणशिबिरस्य समापनसमारोहः सम्पन्नः







हिमसंस्कृतवार्ताः- मुंगेली। छत्तीसगढ़- संस्कृत- विद्यामण्डलस्य, रायपुरस्य तत्त्वावधाने मुंगेलीमण्डलस्य हथनीकलाग्रामे स्थिते श्रीमदष्टभुजीदुर्गामन्दिरे आयोजितस्य सप्तदिवसीय- राज्यस्तरीयस्य संस्कृतशिक्षक- व्याख्यातृ- प्रशिक्षणशिबिरस्य समापनसमारोहः २२ नवम्बर २०२६ तमे दिनाङ्के विविधैः ज्ञानवर्धकैः शिक्षाप्रदैश्च प्रशिक्षणसत्रैः सह गरिमापूर्वकं सम्पन्नः। अस्मिन् प्रशिक्षणशिबिरे प्रदेशस्य विभिन्नेभ्यः क्षेत्रेभ्यः समागताः संस्कृतशिक्षकाः व्याख्यातारश्च उत्साहपूर्वकं सहभागितां कृतवन्तः। ते संस्कृतभाषायाः, साहित्यस्य, व्याकरणस्य, शिक्षणकौशलस्य, सङ्गीतस्य, नृत्यस्य, योगस्य तथा संस्कृतसम्भाषणस्य च विविधविषयेषु प्रशिक्षणं प्राप्तवन्तः। समापनसमारोहे छत्तीसगढ़- संस्कृत- विद्यामण्डलस्य अध्यक्षः राजेशकुमारराजपूत-महोदयः मुख्यातिथिरूपेण उपस्थितः आसीत्। कार्यक्रमे क्षेत्रीय- क्षत्रियसमाजस्य अध्यक्षः नर्मदासिंहठाकुर-राजपूतमहोदयः विशिष्टातिथि-रूपेण उपस्थितः आसीत्। अन्ये विशिष्टातिथयः रोहितठाकुरः, मनीषिंहठाकुरः, दिनेशसिंहठाकुरः, गोविन्दसिंहः, नरेन्द्रसिंहः (तखतपुरम्), सुषमाप्रीतमकौशले, चैनसिंहठाकुरः, दिनेशसिंहः (जोगीपुरम्), पीताम्बरसिंहठाकुरः, मोहनसिंहठाकुरः, समाजसेवकः विश्रामसिंहः, शिबिरसञ्चालिका नम्रताचन्द्राकरमहोदया च उपस्थिताः आसन्। समारोहस्य शुभारम्भः सरस्वतीपूजया, वैदिकमङ्गलाचरणेन, पुष्पधूपसमर्पणेन च अभवत्। प्रशिक्षणशिबिरस्य प्रथमसत्रादारभ्य अन्तिमसत्रपर्यन्तं विषयविशेषज्ञैः योगस्य व्यायामस्य च नियमितः अभ्यासः कारितः। अनेन प्रशिक्षार्थिनः शारीरिकस्वास्थ्यस्य, मानसिकैकाग्रतायाः, दैनन्दिनजीवने योगस्य महत्त्वस्य च विषये अवगताः अभवन्। बालकृष्णत्रिपाठीमहोदयः, डॉ. पञ्चाननपण्डामहोदयः, होमेश्वरचन्द्राकरमहोदयः, डॉ. रामबाबूमिश्रमहोदयः, रितेशयादवमहोदयः, मनीषकुमारभार्गवमहोदयः, प्रीतमतिवारीमहोदयः, दीपादुबे, अस्मितामहोदया, तपेश्वरः, रितेशः, हुकुमसायः, डलमनियावर्या, विनोददुबे, सञ्जयदुबे, रोशनकुमारराजपूतः, बीरबलसोनकरः, रामनिवासराठौरः, धनीरामः इत्यादिभिः विद्वद्भिः संस्कृतसाहित्यस्य विविधेषु पक्षेषु व्याख्यानानि प्रशिक्षणं च प्रदत्तम्। प्रशिक्षणस्य अन्तर्गतं संस्कृतकाव्यस्य, गद्यस्य, पद्यस्य, नाटकस्य, व्याकरणस्य, भारतीयज्ञानपरम्परायाः विविधविषयेषु विस्तरेण प्रकाशः कृतः। संस्कृतशिक्षणं सरलं, सुगमं, प्रभावपूर्णं रुचिकरं च कर्तुं विविधाः शिक्षणपद्धतयः, क्रियाकलापाः तथा प्रयोगात्मकाः विधयः अपि अभ्यासिताः।शिबिरस्य समापनदिवसे संस्कृतसङ्गीतस्य, नृत्यकलायाः, संस्कृतसम्भाषणस्य विशेषं महत्त्वं प्रदत्तम्। सङ्गीतप्रशिक्षणस्य अन्तर्गतं संस्कृतगीतानां स्तोत्राणां च सस्वरगायनस्य अभ्यासः कारितः। नृत्यप्रशिक्षणेन भारतीयसांस्कृतिकपरम्परायाः, लयस्य, तालस्य, भावाभिव्यक्तेः विविधपक्षाणां परिचयः प्रदत्तः। संस्कृतसम्भाषणसत्रे च दैनन्दिनजीवने संस्कृतभाषायाः प्रयोगः, सरलवार्तालापः, प्रश्नोत्तराणि, व्यावहारिकसंवादस्य च अभ्यासः कारितः। एताभिः गतिविधिभिः प्रशिक्षार्थिषु संस्कृतभाषायाः प्रयोगे आत्मविश्वासवर्धनं, व्यावहारिकभाषादक्षतायाः विकासः कर्तुं विशेषः प्रयासः कृतः।

अस्मिन् सप्तदिवसीये प्रशिक्षणशिबिरे विषयविशेषज्ञैः प्रदत्तं प्रशिक्षणं संस्कृतशिक्षकाणां व्याख्यातृणां च कृते अत्यन्तम् उपयोगि ज्ञानवर्धकं च अभवत्। शिबिरस्य प्रमुखम् उद्देश्यम् आसीत्- संस्कृतशिक्षणस्य गुणवत्तायाः संवर्धनम्, शिक्षकाणां नवीनाभिः प्रभावशालीभिः शिक्षणपद्धतिभिः परिचयः, विद्यालयेषु जनसामान्येषु च संस्कृतभाषायाः प्रचारः, प्रसारः, व्यवहारोपयोगितायाः वर्धनम्। समापनसमारोहे शिबिरसञ्चालिका नम्रताचन्द्राकरमहोदया सप्तदिवसीयस्य प्रशिक्षणशिबिरस्य विस्तृतं प्रतिवेदनं प्रस्तुतवती, शिबिरस्य विविधासां गतिविधीनां उपलब्धीनां च विवरणं प्रदत्तवती। ततः हेमन्तसाहुमहोदयेन आयोजकमण्डलस्य पक्षतः समस्तेभ्यः अतिथिभ्यः, प्रशिक्षकेभ्यः, प्रशिक्षार्थिभ्यः तथा सहयोगिभ्यः कृतज्ञतापूर्वकम् आभारप्रदर्शनं कृतम्। एवं श्रीमदष्टभुजीदुर्गामन्दिरे, हथनीकलाग्रामे आयोजितं सप्तदिवसीयं राज्यस्तरीयं संस्कृतशिक्षक- व्याख्यातृ- प्रशिक्षणशिबिरं ज्ञानस्य, संस्कृतेः, कलायाः, योगस्य, संस्कृतभाषायाः प्रचार- प्रसार- संवर्धनस्य च दृढसङ्कल्पेन सफलतापूर्वकं सम्पन्नम्।

न्यायवैशेषिकदर्शनस्य विश्वविख्यातः प्रकाण्डविद्वान् आचार्यः बदरीनाथशुक्लः श्रद्धया स्मृतः

आचार्यबदरीनाथशुक्लस्य ३९वीं पुण्यतिथौ उत्तरप्रदेशसंस्कृतशिक्षकसङ्घस्य भावपूर्णा श्रद्धाञ्जलिः।



हिमसंस्कृतवार्ताः- नवम्बरमासस्य २२ दिनाङ्के भारतीयदर्शनस्य, विशेषतः न्यायवैशेषिकदर्शनस्य, विश्वविख्यातस्य प्रकाण्डविदुषः, काश्याः प्राचीनायाः गौरवशालिन्याः शास्त्रार्थपरम्परायाः अद्वितीयस्तम्भस्य च स्मृतिशेषस्य आचार्यस्य पण्डितबदरीनाथशुक्लस्य ३९वीं पुण्यतिथिः श्रद्धापूर्वकं समाचर्यते। आचार्यशुक्लमहोदयः न केवलं काश्यां, अपि तु समग्रे संस्कृतजगति पारम्परिकासु शास्त्रार्थसभासु स्वकीयेन अप्रतिमेन पाण्डित्येन, सूक्ष्मदृष्ट्या, गम्भीरचिन्तनेन, आशुविचारशक्त्या च विशिष्टां प्रतिष्ठां प्राप्तवान् आसीत्। गम्भीरविषयेषु स्वकीयया असाधारणया तर्कशक्त्या पाण्डित्यपूर्णानि समाधानानि प्रस्तुत्य सः विद्वत्समाजस्य विशेषमादरं प्राप्नोत्। तस्य शास्त्रार्थकौशलस्य तार्किकप्रतिभायाश्च पुरतः महानुभावा अपि नतमस्तका भवन्ति स्म।मातुः सरस्वत्याः अनन्योपासकस्य, संस्कृतविद्यायाः महान् साधकस्य, प्रातःस्मरणीयस्य आचार्यप्रवरस्य पण्डितबदरीनाथशुक्लस्य अमूल्यं योगदानं संस्कृतजगतः कृते सदैव स्मरणीयं भविष्यति। तस्य पावनस्मृतिभ्यः सादरं नमनं, विनम्रं वन्दनं च समर्प्यते। इति उत्तरप्रदेशसंस्कृतशिक्षकसङ्घस्य पक्षतः आचार्यश्रीबदरीनाथशुक्लाय भावपूर्णा श्रद्धाञ्जलिः।



बाबू बनारसीदासविश्वविद्यालयस्य दीक्षान्तसमारोहे रक्षामन्त्री राजनाथसिंहस्य गरिमामयी उपस्थितिः-

प्रतिभावद्भ्यः छात्रेभ्यः शुभकामनाः प्रदत्ताः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। लखनऊस्थे बाबू बनारसीदासविश्वविद्यालये आयोजिते 'दीक्षान्तसमारोहे- २०२६' यशस्विनः केन्द्रीय रक्षामन्त्रिणः, लखनऊलोकसभाक्षेत्रस्य लोकप्रियस्य सांसदस्य श्रीराजनाथसिंहस्य गरिमामय्याः उपस्थितेः अवसरे कार्यक्रमं सम्बोधयन् वक्ता उपाधिप्राप्तेभ्यः सर्वेभ्यः प्रतिभावद्भ्यः छात्रेभ्यः हार्दिकाभिनन्दनानि अर्पितवान्। तेषाम् उज्ज्वलभविष्याय शुभकामनाः प्रदत्तवान्। अस्मिन् अवसरे सः अवदत् यत् दीक्षान्तसमारोहः विद्यार्थिनां जीवनस्य महत्त्वपूर्णः सोपानः अस्ति। अयं समारोहः तान् ज्ञानकौशलाभ्याम् आत्मविश्वासेन च समन्वितान् कृत्वा राष्ट्रनिर्माणस्य नवीनदायित्वानां निर्वहणाय प्रेरयति। युवशक्तिः स्वप्रतिभया, परिश्रमेण, नवाचारैश्च विकसितभारतस्य विकसित-उत्तरप्रदेशस्य च सङ्कल्पं साकारं कर्तुं महत्त्वपूर्णां भूमिकां निर्वक्ष्यतीति मम पूर्णः विश्वासः इति सः अवदत्।अस्मिन् गरिमामये समारोहे विधायकः योगेशशुक्लवर्यः, विधायिका अदितिसिंहवर्या, विश्वविद्यालयस्य कुलाधिपतिः अलकादासमहोदया, सहकुलाधिपतिः विराजसागरदासमहोदयः, उपाध्यक्षः सोनाक्षीदासवर्या, कुलपतिः एस. के. श्रीवास्तवमहोदयः, कोषाध्यक्षः आर. के. अग्रवालवर्यः, बीबीडीसमूहस्य उपाध्यक्षा देवांशिदासवर्या अन्ये च गणमान्यजनाः उपस्थिताः आसन्।

संस्कृतशिक्षक- प्रशिक्षण- कार्यशालायाः प्रथमसमूहस्य प्रशिक्षणं सफलतया सम्पन्नम्, द्वितीयसमूहस्य प्रशिक्षणम् आरप्स्यते



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेय लखनऊम्। उत्तरप्रदेश- संस्कृत- संस्थानस्य, लखनऊ इत्यस्य उत्तरप्रदेश- माध्यमिक- संस्कृत-शिक्षापरिषदश्च संयुक्ततत्त्वावधाने आयोजितायाः संस्कृतशिक्षक- प्रशिक्षण- कार्यशालायाः प्रथमसमूहस्य प्रशिक्षणकार्यक्रमः सफलतया सम्पन्नः। प्रशिक्षणकार्यक्रमस्य समापनावसरे प्रतिभागिभ्यः शिक्षकेभ्यः प्रमाणपत्राणि प्रदत्तानि। कार्यशालायाः विभिन्नेषु प्रशिक्षणसत्रेषु शिक्षकाः उत्साहपूर्वकं सहभागिताम् अकुर्वन्। अस्मिन् प्रशिक्षणकार्यक्रमे ते संस्कृतशिक्षणस्य नूतनाभिः शिक्षणपद्धतिभिः, गतिविध्याधारितशिक्षणस्य व्यावहारिक- विधिभिः च परिचिताः अभवन्। प्रथमसमूहस्य प्रशिक्षणस्य सफलसमापनानन्तरं द्वितीयसमूहस्य प्रशिक्षणकार्यक्रमः श्वः, दिनाङ्के २०२६ तमस्य वर्षस्य नवम्बरमासस्य २३ दिनाङ्कात् प्रारप्स्यते। अवसरेऽस्मिन् सर्वेभ्यः प्रशिक्षकेभ्यः प्रतिभागिशिक्षकेभ्यश्च सक्रियसहयोगाय उत्साहपूर्णसहभागितायै च हार्दिकं धन्यवादं शुभकामनाश्च समर्पिताः।

पाटलिपुत्रे नवम्बरमासस्य २८ दिनाङ्कतः त्रिदिवसीयः डीएवीयूनाइटेड- महोत्सवः भविष्यति

हिमसंस्कृतवार्ताः- डॉ विमलेश झा, नवदेहली/ पाटलिपुत्रम्। डीएवी- महाविद्यालय- प्रबन्धकर्तृसमितेः, डीएवी- यूनाइटेड- फाउण्डेशन इत्यनयोः संयुक्ततत्त्वावधाने अष्टमस्य डीएवी- यूनाइटेड- महोत्सवस्य आयोजनं बिहारस्य राजधानीक्षेत्रे पाटलिपुत्रे भविष्यति। अयं त्रिदिवसीयः महोत्सवः २०२६ तमस्य वर्षस्य नवम्बरमासस्य २८ दिनाङ्कतः ३० दिनाङ्कपर्यन्तं आयोजितः भविष्यति। अस्य आयोजनं पाटलिपुत्रस्य बापूसभागारे, ज्ञानभवने च भविष्यति। अस्मिन् महोत्सवे सम्पूर्णभारतवर्षात् विदेशेभ्यश्च डीएवीसंस्थानां छात्राः, पूर्वच्छात्राः, अभिभावकाः, शिक्षकाः च सहभागितां करिष्यन्ति। अयं महोत्सवः युवानां सांस्कृतिक-प्रतिभानां प्रदर्शनाय, पूर्वच्छात्राणां पुनर्मेलनाय, परस्परसम्पर्कस्य संवर्धनाय च महत्त्वपूर्णम् अवसरं प्रदास्यति। महोत्सवस्य उद्घाटनसमारोहे डीएवी- महाविद्यालय- प्रबन्धकर्तृसमितेः पदाधिकारीणां विशिष्टातिथीनां च सहभागिता भविष्यति। पद्मश्री डॉ. पूनम सूरी, डॉ. निशा पेशिन च प्रमुखरूपेण उपस्थितौ भविष्यतः। महोत्सवे विविधाः सांस्कृतिकाः मनोरञ्जनात्मकाः च कार्यक्रमाः आयोजिताः भविष्यन्ति। तेषु विद्यालयानां मध्ये सङ्गीतनृत्यप्रतिभाकार्यक्रमाः, हास्यकार्यक्रमाः, विख्यातकलाकाराणां प्रस्तुतयः, सजीवसङ्गीतकार्यक्रमाश्च प्रमुखाः भविष्यन्ति। डीएवीबिहारक्षेत्रस्य विभिन्नविद्यालयानां छात्राः स्वप्रतिभां प्रदर्शयिष्यन्ति। अस्य अतिरिक्तं पूर्वच्छात्राणां पुनर्मिलनकार्यक्रमाः, विभिन्नकक्षाणां पूर्वच्छात्राणां सम्मेलनानि, यूनिफायर्ससमूहस्य उपवेशनानि, छात्रैः सञ्चालिताः विक्रयकेन्द्राणि च आयोजितानि भविष्यन्ति। आगन्तुकानां कृते खाद्यपदार्थानां विविधाः विक्रयकेन्द्राणि, क्रीडाक्षेत्राणि, परस्परसम्पर्कस्य विशेषव्यवस्थाश्च भविष्यन्ति।महोत्सवस्य कार्यक्रमाः प्रतिदिनं प्रातः नववादनात् रात्रौ सार्धदशवादनं यावत् भविष्यन्ति। मुख्यकार्यक्रमाः प्रातः एकादशवादनात् रात्रौ नववादनपर्यन्तं सञ्चालिताः भविष्यन्ति। उल्लेखनीयमस्ति यत् अस्य महोत्सवस्य सप्तमं संस्करणं २०२५ तमस्य वर्षस्य दिसम्बरमासे नवदिल्ल्याः भारतमण्डपम् इत्यत्र आयोजितम् आसीत्। तत्र प्रायः पञ्चाशत्सहस्राधिकाः जनाः सहभागितां कृतवन्तः। अष्टमस्य संस्करणस्य आयोजनं पाटलिपुत्रे अधिकोत्साहेन भविष्यति इति अपेक्षा अस्ति। अयं महोत्सवः छात्राणां प्रतिभाविकासाय, सांस्कृतिकैकतायाः संवर्धनाय, डीएवीपरिवारस्य सदस्येषु पारस्परिकसौहार्दस्य दृढीकरणाय च महत्त्वपूर्णं माध्यमं भविष्यति।

श्रद्धेयस्य मुलायमसिंहयादवस्य जयन्त्यवसरे
उपमुख्यमन्त्रिणा बृजेशपाठकेन श्रद्धाञ्जलिः समर्पिता





हिमसंस्कृतवार्ताः-
वृजेशकुमारपाण्डेयः लखनऊ। देशस्य पूर्वरक्षामन्त्री उत्तरप्रदेशस्य च पूर्वमुख्यमन्त्री श्रद्धेयः मुलायमसिंहयादवः जयन्तीदिने स्मर्यते। अस्मिन् अवसरे उत्तरप्रदेशस्य उपमुख्यमन्त्री बृजेशपाठकेन तस्मै विनम्रश्रद्धाञ्जलिः समर्पिता। उपमुख्यमन्त्री अवदत् यत् अस्माकं पीढी तं 'धरतीपुत्रः', 'नेताजी' इति नामभ्यां जानाति। उत्तरप्रदेशस्य राजनीतिक्षेत्रे मुलायमसिंहयादवः केवलं राजनीतिज्ञः नासीत्, अपि तु सः सम्पूर्णस्य राजनीतिकाध्यायस्य प्रतिनिधिरूपेण स्मर्यते। हिन्दीभाषिभागस्य प्रभावशालिषु नेतृषु परिगणितः नेताजी समाजवादी- आन्दोलनस्य सुदृढीकरणे सामाजिकन्यायस्य च स्वरं प्रबलतया उत्थापयितुं महत्त्वपूर्णां भूमिकाम् अवहत्। सः अवदत् यत् २०१९ तमे वर्षे लोकसभायाः अन्तिमाधिवेशनस्य समये नेताजिना तत्कालीनस्य प्रधानमन्त्रिणः नरेन्द्रमोदिनः पुनः प्रधानमन्त्रीभवितुं शुभकामना कृता आसीत्। तदा तस्य वक्तव्यस्य देशव्यापिनी चर्चा अभवत्। अस्य वक्तव्यस्य पृष्ठतः गहनं वैचारिकं कारणम् आसीदिति मम मतम्। अस्य विषयस्य गम्भीरचिन्तनं कृत्वा अनेकैः बुद्धिजीविभिः सह विचारविनिमयं कृत्वा अहम् एतत् निष्कर्षं प्राप्तवान्। नेताजी अकाङ्ग्रेसवादस्य राजनीतिक-विचारधारायाः प्रभावेण विकसितः नेता आसीत्। आपत्कालस्य समये लोकतन्त्रस्य रक्षार्थं तेन यातनाः सोढाः। सः लोकनायकस्य जयप्रकाशनारायणस्य अनुयायी, डॉ. राममनोहरलोहियावर्यस्य आदर्शान् स्वीकृतवान् आसीत्। अद्य यदि अकाङ्ग्रेसवादस्य विचारधारां व्यापकस्तरे अग्रे नेतुं लोहियामहोदयस्य जयप्रकाशनारायणस्य स्वप्नानि साकारयितुं च कश्चित् प्रयतते, तर्हि तत् प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वे भारतीयजनतापक्षः इति तस्य मतम्। डॉ. लोहियामहोदयस्य स्वप्नम् आसीत् यत् स्वच्छतायाः, समानतायाः, सामाजिकन्यायस्य, आर्थिकसशक्तीकरणस्य च लाभः समाजस्य अन्तिमे सोपाने स्थिताय व्यक्तये अपि प्राप्नुयात्। प्रधानमन्त्री श्रीनरेन्द्रमोदी संसदि डॉ. लोहियामहोदयस्य स्वच्छतासम्बद्धानां विचाराणाम् उल्लेखं कुर्वन् स्वच्छताभियानस्य प्रवर्तनं तस्मै श्रद्धाञ्जलिः इति प्रतिपादितवान् आसीत्। तस्मिन् समये नेताजी अपि सदने उपस्थितः आसीत्। निर्धनानां, कृषकाणां, पिछडावर्गीयानां, दलितानां, वञ्चितानां च सशक्तीकरणाय केन्द्रसर्वकारस्य विविधाः योजनाः एतामेव विचारधारां व्यवहाररूपेण परिणमयितुं प्रयतन्ते।मम मतानुसारं नेताजी एतान् वैचारिकान् सामाजिकान् च विषयान् दृष्ट्वैव प्रधानमन्त्री श्रीनरेन्द्रमोदी पुनः प्रधानमन्त्री भवेदिति कामनाम् अकरोत्। उल्लेखनीयम् अस्ति यत् प्रधानमन्त्री मोदी चौधरीचरणसिंहाय, जननायककर्पूरीठाकुराय तथा नेताजी मुलायमसिंहयादवाय अपि समुचितं राष्ट्रियसम्मानं स्मरणं च प्रदत्तवान्। एतत् तेषां योगदानस्य सार्वजनिकजीवनस्य च विरासतायाः प्रति सम्मानस्य प्रतीकम् अस्ति। उपमुख्यमन्त्री दुःखं प्रकटयन् अवदत् यत् वर्तमानस्य समाजवादीपक्षस्य नेतृत्वं नेताजी, जनेश्वरमिश्रः, मोहनसिंहः, रमाशङ्करकौशिकः इत्यादीनां समाजवादी- विचारधारायाः अग्रदूतानां परम्परायाः राजनीतिकविरासतश्च दूरं गच्छदिव दृश्यते। नेताजिनः जयन्ती यया गरिमया, वैचारिक- प्रतिबद्धतया, व्यापकजनसहभागितया च आयोजनीया, सा अपेक्षितरूपेण न दृश्यते। अद्य समाजवादीपक्षे नेताजिनः विचाराणां, सङ्घर्षाणां, कार्यक्रमाणां, वास्तविकसमाजवादस्य च चर्चा किमर्थं सीमिता भवति इति विचारणीयः प्रश्नः अस्ति। राजनीतिः केवलं सत्ताप्राप्तेः साधनं नास्ति, अपितु विचाराणां, सिद्धान्तानां, जनसेवायाः च प्रति प्रतिबद्धतायाः नाम अस्ति। सत्ताराजनीत्यर्थं सिद्धान्तैः सह समझौताकरणं न केवलं राजनीतिकपापम्, अपि तु वैचारिकभ्रष्टाचारस्य महान् उदाहरणम् अपि अस्ति

राष्ट्रियच्छात्रसेनायाः स्थापना-दिवसोपलक्ष्ये सर्वेभ्यः छात्रसैनिकेभ्यः
प्रशिक्षकेभ्यश्च शुभकामनाः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। राष्ट्रियच्छात्रसेनायाः (एनसीसी) स्थापना-दिवसस्य शुभावसरे सर्वेभ्यः छात्रसैनिकेभ्यः प्रशिक्षकेभ्यश्च हार्दिक्यः शुभकामनाः प्रदत्ताः। राष्ट्रियच्छात्रसेना युवान् स्वसहचराणां सहयोगं कर्तुं, कठिनसमये धैर्यं धारयितुम्, आवश्यकतायां नेतृत्वदायित्वं निर्वोढुं च शिक्षयति। एते एव गुणाः युवानां व्यक्तित्वविकासे सहायकाः भूत्वा तान् कर्तव्यनिष्ठान् उत्तरदायिनः च नागरिकान् निर्मान्ति। राष्ट्रियच्छात्रसेना युवासु अनुशासनस्य, सेवाभावस्य, राष्ट्रभक्तेः, नेतृत्वक्षमतायाश्च विकासे महत्त्वपूर्णां भूमिकां निर्वहति।

बिहारराज्यस्य एकमात्रस्य संस्कृतविश्वविद्यालयस्य अपरमुख्यसचिवेन आकस्मिकं निरीक्षणम्
संस्कृतस्य वैश्विकप्रचारप्रसाराय 'बिहारी-संस्कृत-डायस्पोरा' इति अभिनवः सङ्कल्पः; आगामिनि ५ दिसम्बर दिनाङ्के दीक्षान्तसमारोहे महामहिमराज्यपालमहोदयस्य आगमनमपि सम्भावितम्

दरभंगाः २२-११-२०२६ दिनाङ्के प्रातः ०८:४५ वादने बिहारराज्यस्य शिक्षाविभागस्य अपरमुख्यसचिवेन श्रीमता सी. के. अनिलमहोदयेन मिथिलायाः गौरवभूते बिहारराज्यस्य एकमात्रे च संस्कृतविश्वविद्यालये—कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालये आकस्मिकं निरीक्षणं कृतम्। ध्यातव्यं यत् आगामिनि ५ दिसम्बर दिनाङ्के विश्वविद्यालयस्य भव्यः दीक्षान्तसमारोहः आयोजितः भविष्यति, यस्मिन् कुलाधिपतेः महामहिमराज्यपालमहोदयस्य गरिमामयम् आगमनमपि सम्भावितम् अस्ति। निरीक्षणकाले विश्वविद्यालयस्य डॉ. नवीनकुमारझा (उपकुलसचिवः-प्रथमः), डॉ. पवनकुमारझा (वित्तपदाधिकारी), सुशीलकुमारझा (निजीसहायकः) च सहितं क्षेत्रीयशिक्षा-उपनिदेशकः मो. असगर अली, जिलाशिक्षापदाधिकारी (विद्यानन्दठाकुरः, जिलाकार्यक्रमपदाधिकारी सञ्जयकुमारः, राजकुमारराजू, श्रीमती रञ्जना कुमारी, कार्यपालक-अभियन्ता मिथिलेशकुमारः तथा क्षेत्रीयशिक्षा-उपनिदेशक-कार्यालयस्य कर्मी राजीवकुमारयादवः च उपस्थिताः आसन्। देवभाषायाः संस्कृतस्य समग्रविकासाय वैश्विकविस्ताराय च अपरमुख्यसचिवमहोदयेन अधोलिखिताः दूरगामिनः निर्देशाः प्रदत्ताः—• 'बिहारी-संस्कृत-डायस्पोरा' तथा पूर्ववर्तिच्छात्राणां महासङ्गमः: गणतन्त्रदिवसे विश्वविद्यालयस्य स्थापनादिवसे (२६ जनवरी) च देशे-विदेशे च निवसतः प्रतिभाशालिनः पूर्ववर्तिच्छात्रान् 'बिहारी-संस्कृत-डायस्पोरा' इत्यस्य अन्तर्गतं संयोजयितुं दिसम्बरमासात् एव सादरं निमन्त्रणं प्रेषणीयम्। गणतन्त्रदिवससमारोहानन्तरं तैः सह विशेषगोष्ठीं विधाय विश्वविद्यालयस्य मेधाविभ्यः शीर्षस्थानप्राप्तच्छात्रेभ्यः छात्रवृत्तिः, आजीविकाप्रोत्साहनं तथा विश्वस्तरे संस्कृतस्य प्रचारप्रसारे तेषां सक्रियसहयोगः इत्येतेषु विषयेषु गहनः विमर्शः करणीयः।

यमुनायाः संरक्षणाय पुनरुज्जीवनाय च राष्ट्रव्यापिनः अभियानस्य आह्वानम्- भारतमण्डपे आयोजिते कार्यक्रमे सम्बोधनम्

हिमसंस्कृतवार्ताः- नवदेहली।

मुरारिकायकालिमाललामवारिधारिणी।
तृणीकृतत्रिविष्टपा त्रिलोकशोकहारिणी॥

नवदेहल्याः भारतमण्डपनाम्नि सभागारे यमुनापरिवारपरिषदा आयोजिते मातुः यमुनायाः संरक्षणस्य पुनरुज्जीवनस्य च राष्ट्रव्यापिनः अभियानस्य अवसरे सम्बोधनं कृतम्। माता यमुना भारतीयसभ्यतायाः, संस्कृतेः, आध्यात्मिकचेतनायाश्च अविच्छिन्ना प्रवाहधारा अस्ति। भगवान् श्रीकृष्णस्य लीलाभ्यः आरभ्य ब्रजप्रदेशस्य लोकपरम्पराभ्यः यावत् यमुनायाः उल्लेखः अस्माकं धार्मिकसांस्कृतिकवाङ्मये विशेषश्रद्धया प्राप्यते। यमुनोत्रीतः प्रयागराजपर्यन्तं प्रवहन्ती माता यमुना केवलम् आस्थायाः केन्द्रं न, अपि तु उत्तरभारतस्य विशालभूभागस्य कृषेः, जनजीविकायाः, जलसुरक्षायाश्च महत्त्वपूर्णम् आधारभूतं स्रोतः अस्ति। यमुनायाः पुनरुज्जीवनं केवलं जलस्य स्वच्छतायां सीमितं नास्ति, अपि तु तस्याः प्राकृतिकप्रवाहस्य, सहायकनदीनाम्, जलग्रहण-क्षेत्राणां, जैवविविधतायाश्च संरक्षणेन सह सम्बद्धः व्यापकः प्रयासः अस्ति। मलजलस्य औद्योगिकावशिष्टानां च वैज्ञानिकविधिना संशोधनं, वर्षाजलसञ्चयः, भूजलस्य पुनर्भरनं, सम्पूर्ण-नदीजलप्रवाहक्षेत्रस्य समन्वितं प्रबन्धनं च अस्मिन् दिशि अत्यावश्यकानि सन्ति।



अस्य महत्त्वपूर्णस्य कार्यस्य सिद्धये केन्द्रसर्वकारस्य, राज्यसर्वकाराणां च सह सन्तसमाजस्य, सामाजिकसङ्गठनानां, उद्योग-जगतः, नागरिकानां च सक्रियसहभागिता अनिवार्या अस्ति। मम दृढः विश्वासः अस्ति यत् यदा श्रद्धा कर्तव्यरूपेण परिणमते, सङ्कल्पश्च सामूहिकप्रयत्नेषु परिवर्तते, तदैव वास्तविक-परिवर्तनस्य मार्गः प्रशस्तः भवति। मातुः यमुनायाः स्वच्छतां, निर्मलताम्, अविरलप्रवाहं च अक्षुण्णं रक्षितुं प्रयत्नः अस्माकं सांस्कृतिक-विरासतायाः संरक्षणस्य तथा भाविपीढीनां प्रति अस्माकं महत्त्वपूर्णस्य दायित्वस्य च निर्वहनमस्ति

छात्रावासे निवासं करोतु मा वा, छात्रेभ्यः छात्रावासशुल्कं दातव्यम्? सूचना-आयुक्तेन विद्यालयनिरीक्षकाय प्रेषितः कारणदर्शनसूचनापत्रम्

गौतमबुद्धनगरे विद्यालयस्य शुल्कनियमविषये सूचना-आयुक्तेन मोहम्मद नदीमेन स्पष्टीकरणं याचितम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेय गौतमबुद्धनगर। जनपदे स्थितस्य एकस्य विद्यालयस्य छात्रावासशुल्कसम्बद्धः प्रकरणः सम्प्रति चर्चायां वर्तते। विद्यालयप्रशासनेन नियमानुसारं प्रत्येकस्मात् छात्रात् छात्रावासशुल्कं गृहीतव्यम् इति कथ्यते। छात्रः छात्रावासे निवसतु अथवा न निवसतु, तथापि तेन छात्रावासशुल्कं दातव्यम् इति विद्यालयस्य नियमः अस्ति। अस्य नियमस्य विरोधे एकेन छात्रेण सूचनाधिकाराधिनियमस्य अन्तर्गतं सूचनायाचनापत्रं प्रस्तुतम्। सम्प्रति अस्य प्रकरणस्य श्रवणं सूचना-आयुक्तस्य मोहम्मद नदीमस्य पीठेन क्रियते। **सूचना-आयुक्तस्य आदेशः-** सूचना-आयुक्तेन मोहम्मद् नदीमेन गौतमबुद्धनगरस्य विद्यालयनिरीक्षकाय कारणदर्शनसूचनापत्रं प्रेषितम्। अस्मिन् प्रकरणे विद्यालयस्य शुल्कनियमस्य औचित्यं, सम्पूर्णविषये स्वस्य स्पष्टीकरणं च प्रस्तौतुं निर्देशः प्रदत्तः।

प्रश्नः अस्ति यत् छात्रः यदि विद्यालयस्य छात्रावासे न निवसति, तर्हि तस्मात् छात्रावासशुल्कस्य अनिवार्यरूपेण ग्रहणं कियत् युक्तिसङ्गतम्? अस्य विषयस्य समाधानं विद्यालयनिरीक्षकस्य स्पष्टीकरणानन्तरं स्पष्टं भविष्यति।

पञ्चमे राष्ट्रिय- कौशल- दीक्षान्तसमारोहे प्रधानमन्त्री नरेन्द्रमोदिना ५२ प्रतिभाशालिनः युवानः सम्मानिताः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। विकसितभारतस्य स्वप्नं तेषां प्रतिभाशालिनां युवानां हस्ताभ्यां साकारं भविष्यति, ये स्वकीयकौशलेन नवीनमार्गान् निर्मान्ति। एते युवानः राष्ट्रस्य प्रगतौ महत्त्वपूर्णां भूमिकां निर्वहन्ति। लखनऊनगरे यशस्विनः प्रधानमन्त्री श्रीनरेन्द्रमोदिनः गरिमामय्याः उपस्थितौ आयोजिते पञ्चमे राष्ट्रियकौशलदीक्षान्तसमारोहे सहभागिता कृता। अस्मिन् अवसरे औद्योगिक- प्रशिक्षण- संस्थानानां, राष्ट्रिय- कौशल- प्रशिक्षण- संस्थानानां, प्रशिक्षक- प्रशिक्षण- संस्थानानां ५२ राष्ट्रियस्तरीय- श्रेष्ठप्रतिभागिभ्यः प्रधानमन्त्रिणा सम्मानं प्रदाय तेषाम् उत्साहवर्धनं कृतम्। सर्वेभ्यः युवभ्यः उज्ज्वलभविष्याय हार्दिक्यः शुभकामनाः प्रदत्ताः। अस्मिन् समारोहे देशस्य रक्षामन्त्री राजनाथसिंहः, उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः, केन्द्रीय राज्यमन्त्री (स्वतन्त्रप्रभारः), राष्ट्रियलोकदलस्य राष्ट्रियाध्यक्षः जयन्तचौधरी, केन्द्रीय राज्यमन्त्री, भारतीयजनतापक्षस्य उत्तरप्रदेशाध्यक्षः महेन्द्रनाथपाण्डेयः, उत्तरप्रदेशस्य उपमुख्यमन्त्री बृजेशपाठकः, प्रदेशसर्वकारस्य मन्त्रिमण्डलीयमन्त्री डॉ. मनोजपाण्डेयः, राज्यमन्त्री (स्वतन्त्रप्रभारः) कपिलदेवः, अन्ये जनप्रतिनिधयः, गणमान्यजनाः च उपस्थिताः आसन्। अयं कौशलदीक्षान्तसमारोहः युवानां कौशलविकासाय, आत्मनिर्भरतायै, रोजगारावसराणां सृजनाय च प्रेरणादायकः अवसरः अभवत्।

विश्वप्रसिद्धस्य हरिहरक्षेत्र- सोनपुरमेलायाः मुख्यमन्त्रिणा सम्राट चौधरीमहोदयेन विधिवद् उद्घाटनम् कृतम्

हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, सोनपुरम्

विश्वप्रसिद्धस्य बिहारराज्यस्य हरिहरक्षेत्र-सोनपुरमेलायाः उद्घाटनं रविवासरे सायंकाले बिहारराज्यस्य मुख्यमन्त्रिणा सम्राट चौधरिणा भव्यसमारोहे दीपप्रज्वालनं कृत्वा विधिवत् कृतम्। अनेन सह ऐतिहासिकस्य सोनपुरमेलायाः द्वात्रिंशद्दिवसीयस्य आयोजनस्य शुभारम्भः अभवत्। अस्मिन् वर्षे मेला नवम्बरमासस्य २२ दिनाङ्कात् दिसम्बरमासस्य २३ दिनाङ्कपर्यन्तम् आयोज्यते। प्रायः एकविंशतिवर्षाणां दीर्घान्तरालानन्तरं मुख्यमन्त्रिणा मेलायाः उद्घाटनं कृतम् इति कारणेन सोनपुरे समग्रे सारणमण्डले च उत्साहस्य वातावरणम् आसीत्। उद्घाटनसमारोहं सम्बोधयन् मुख्यमन्त्री सम्राट चौधरी अवदत् यत् सोनपुरमेलायाः विकासाय सर्वकारः पूर्णतया तत्परः अस्ति। हरिहरनाथपरिसरस्य विकासः, हरिहरनाथ- कारिडोरेत्यस्य निर्माणं, पर्यटनसुविधानां विस्तारः, आधारभूतसंरचनानां विकासः सर्वकारस्य प्राथमिकतासु अन्तर्भवन्ति। एतैः प्रयासैः सोनपुरस्य धार्मिक- ऐतिहासिक- पर्यटनसम्बद्धायाः परिचयस्य नवशक्तिः भविष्यति।

समारोहे सांसदः राजीवप्रतापरूडी अवदत् यत् स्वस्य सप्तत्रिंशद्वर्षीयायां राजनैतिकयात्रायां एषः तस्य कृते सुखदः अनुभवः अस्ति यत् तस्य दलस्य मुख्यमन्त्री सोनपुरमेलायाः उद्घाटनं कुर्वन् अस्ति। सः बिहारसर्वकारस्य विकासकार्याणां प्रशंसां कुर्वन् अवदत् यत् राज्ये मार्गाणां विस्तृतं जालं निर्मितम् अस्ति, गण्डकीनद्यां चतुर्णां सेतूनां निर्माणकार्यं प्रचलति। सारणमण्डले विमानस्थानकस्य स्वीकृतिप्रदाने अपि मुख्यमन्त्रिणः महत्त्वपूर्णा भूमिका अस्ति। सांसदः जनार्दनसिंहसिग्रीवालः मुख्यमन्त्रिणे मेलायाः उद्घाटनस्य शुभकामनाम् अयच्छत्। सः अवदत् यत् आगामिनिकाले सोनपुरमेला अधिकं भव्यं स्वरूपं प्राप्स्यति। पर्यटनविभागेन सारणजनपदप्रशासनेन च आयोजितस्य समारोहस्य अध्यक्षता पर्यटनमन्त्री केदारप्रसादगुप्तामहोदयेन कृता। अस्मिन् अवसरे उपमुख्यमन्त्री बिजेन्द्रप्रसादयादवः, राजस्व- भूमिसुधारमन्त्री डॉ. दिलीपकुमार जायसवालः, कलासंस्कृतिमन्त्री डॉ. प्रमोदकुमारः, विधायकः जनकसिंहः, पूर्वमन्त्री कृष्णकुमारमण्टूः, विधानपरिषद्सदस्याः डॉ. वीरेन्द्रनारायणयादवः, सच्चिदानन्दरायः, सञ्जयमयूखः, डॉ. राहुलराजः च अन्ये च बहवः जनप्रतिनिधयः उपस्थिताः आसन्।मुख्यसचिवः प्रत्ययअमृतः, अपरमहानिदेशकः कुण्डनकृष्णः, सारणमण्डलायुक्तः, जिलाधिकारी वैभवश्रीवास्तवः, वरिष्ठपुलिसाधीक्षकः रोशनकुमारः इत्यादयः वरिष्ठाधिकारिणः अपि समारोह उपस्थिताः आसन्। कार्यक्रमस्य प्रारम्भः वन्देमातरमगानेन अभवत्। अस्मिन् वर्षे सोनपुरमेलायां धार्मिकश्रद्धायाः, लोकसंस्कृतेः, कलायाः, मनोरञ्जनस्य, व्यापारस्य च अद्भुतः समन्वयः द्रष्टुं शक्यते। पर्यटकानां निवासार्थं स्विस- कुटीराणि निर्मितानि सन्ति। शिल्पविपणिः, सांस्कृतिकसन्ध्याः, गङ्गा-आरती, मल्लयुद्धप्रतियोगिता, नौकाधावनप्रतियोगिता च अस्य मेलायाः प्रमुखाणि आकर्षणानि भविष्यन्ति।





श्रद्धालूनां पर्यटकानां च सुविधार्थं सुरक्षायाः, स्वच्छतायाः, पेयजलस्य, चिकित्सायाः, यातायातस्य च विशेषव्यवस्था कृता अस्ति। सीसीटीवीकैमरायन्त्रैः, ड्रोनयन्त्रैः च सम्पूर्णमेलाक्षेत्रस्य निरीक्षणं करिष्यते। मेलायां पर्याप्तसंख्यायाम् आरक्षीबलस्य अपि नियुक्तिः कृता अस्ति। अस्मिन् वर्षे मेलाम् आगच्छतां पर्यटकानां मनोरञ्जनाय, आवासाय पर्यटनाय च विशेषाः व्यवस्थाः कृताः सन्ति। पर्यटकानां कृते पञ्चतारक- होटलसदृश- सुविधायुक्तानि स्विसकुटीराणि (स्विस कोटेजेज) निर्मितानि सन्ति। पाटलिपुत्रनगरात् सोनपुरमेलादर्शनाय ९०० रूप्यकेभ्यः आरभ्य एकदिवसीयपर्यटनयोजना अपि उपलब्धा भविष्यति। द्विदिवसीय- पारिवारिक- पर्यटनयोजनायाः शुल्कं द्वयोः जनयोः कृते ५२०० रूप्यकाणि निर्धारितम् अस्ति। सोनपुरमेलायां पर्यटकानां निवासाय पर्यटनग्रामे षट् राजकीय- शैलीयुक्तानि स्विस-कुटीराणि सज्जीकृतानि सन्ति। एतेषु कुटीरेषु आधुनिकसुविधाः उपलभ्यन्ते। प्रत्येकस्मिन् कुटीरे शय्याद्वयं, संलग्नस्नानगृहस्य व्यवस्था भविष्यति। पर्यटकाः अत्र पञ्चतारक-होटलसदृशम् अनुभवं प्राप्तुं शक्ष्यन्ति। भारतीयपर्यटकानां कृते एकस्य कुटीरस्य प्रतिदिनं भाटकं ३००० रूप्यकाणि निर्धारितम् अस्ति। विदेशीयपर्यटकानां कृते तु प्रतिदिनं ५००० रूप्यकाणि शुल्कं देयम् भविष्यति। अधिकाधिकाः पर्यटकाः अत्र निवसन्तः मेलायाः आनन्दम् अनुभवेयुः इति उद्दिश्य पर्यटनविभागेन शुल्कं न्यूनं स्थापयितुं प्रयासः कृतः अस्ति। पर्यटकानां परिवाराणां च कृते एकरात्रि- द्विदिवसीय- विशेषपर्यटनयोजना अपि निर्मिता अस्ति। द्वयोः जनयोः कृते अस्याः योजनायाः शुल्कं ५२०० रूप्यकाणि निर्धारितम् अस्ति। अस्यां योजनायां वातानुकूलितेन इटियोस-वाहनेन पटनानगरात् सोनपुरं प्रति आगमन-प्रत्यागमनयोः सुविधा भविष्यति।

अस्मिन् पर्यटनपुटके पर्यटनमार्गदर्शकः, निवासव्यवस्था, प्रातराशः, मध्याह्नभोजनं, रात्रिभोजनं, लघ्वाहारः, पेयजलं च समाविष्टानि सन्ति। पर्यटकाः पर्यटनग्रामे रात्रिं यापयिष्यन्ति। योजनानुसारं प्रथमदिने मध्याह्ने १२ वादने पर्यटननिगमस्य कार्यालयात् वाहनं सोनपुरं प्रति प्रस्थास्यति। पर्यटकाः हरिहरनाथमन्दिरे दर्शनं करिष्यन्ति। ततः पर्यटनग्रामे आयोजितानां सांस्कृतिक- कार्यक्रमाणाम् आनन्दं प्राप्स्यन्ति। द्वितीयदिने मेलायाः दर्शनं कारयिष्यते। अपराह्णे ३ वादनात् ३० निमेषेभ्यः पूर्वं पर्यटकाः पटनानगरं प्रत्यागमिष्यन्ति।

ये पर्यटकाः एकस्मिन्नेव दिने सोनपुरमेलां दृष्ट्वा प्रत्यागन्तुम् इच्छन्ति, तेषां कृते अपि विशेषव्यवस्था कृता अस्ति। एकदिवसीय-पर्यटनयोजना मध्याह्ने १२ वादनात् सायं ७ वादनपर्यन्तं भविष्यति। अस्यां योजनायां वाहनव्यवस्था, प्रशिक्षितपर्यटनमार्गदर्शकः, लघ्वाहारः पेयजलम् च प्रदास्यते।

विभिन्नवाहनानुसारं प्रतिपर्यटकं शुल्कम् अधोलिखितम् अस्ति-

१. वातानुकूलितबसवाहनं, विङ्गरवाहनं डेकर्बस वाहनम्- ९०० रूप्यकाणि।

२. वातानुकूलितट्रैवलरवाहनम्- १००० रूप्यकाणि।

३. इनोवावाहनम्- ११५० रूप्यकाणि।

४. इटियोसवाहनम्- १४०० रूप्यकाणि।

अस्यां योजनायां पर्यटकानां कृते सोनपुरमेलायाः, प्रमुखदर्शनीयस्थलानां, हरिहरनाथमन्दिरस्य दर्शनस्य व्यवस्था भविष्यति। तेषां मार्गदर्शनाय प्रशिक्षितः पर्यटनमार्गदर्शकः अपि उपलब्धः भविष्यति। सोनपुरमेला एकमासपर्यन्तं प्रचलिष्यति। अस्मिन् अवधौ सांस्कृतिकमण्डपे प्रतिदिनं विविधाः सांस्कृतिकाः कार्यक्रमाः आयोजयिष्यन्ते। इत्थं सोनपुरमेला केवलं व्यापारिक- महोत्सवः न भूत्वा धार्मिक- सांस्कृतिक- पर्यटनस्य प्रमुखं केन्द्रम् अपि भविष्यति।

नवाचारैः, समर्पणेन, शतप्रतिशतसफलतया च शिक्षाक्षेत्रे नवीनम् आदर्शं स्थापितवती उषासिंहः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, चन्दौली। जनपदस्य शहाबगञ्ज- विकासखण्डान्तर्गतस्य सैदूपुर- पूर्वमाध्यमिक- विद्यालयस्य सहायकाध्यापिका उषासिंहवर्या स्वसमर्पितप्रयत्नैः विद्यालयस्य शैक्षिकगुणवत्तायाः विद्यार्थिनां च उपलब्धीनां विकासे नूतनम् आदर्शं स्थापितवती अस्ति।

'विद्यालयं प्रति चलामः' अभियानस्य, भौतिकसुविधानां विकासस्य माध्यमेन शैक्षिकसत्रे २०२५-२६ तमे वर्षे विद्यालये १५८ विद्यार्थिनां नामाङ्कनं सुनिश्चितं कृतम्। तेषु ९६ बालिकाः, ६२ बालकाश्च सन्ति। हस्तनिर्मितशिक्षणसामग्रीभिः, बुद्धिमद्दूरदर्शनयन्त्रेण, वीथिनाटकैः, कृत्रिमबुद्धिमत्तया, भूमिकाभिनयाधारितशिक्षणेन च १८ नवाचारात्मकाः प्रयोगाः क्रियान्विताः। दीक्षाप्रशिक्षणस्य, परियोजनाधारितशिक्षणस्य, क्रियाद्वारा शिक्षणपद्धतेश्च माध्यमेन विद्यार्थिनाम् अधिगमस्तरे उल्लेखनीयः सुधारः अभवत्। गृहसम्पर्ककार्यक्रमैः, महिला- सशक्तीकरण- कार्यक्रमैः, प्रभावशालिन्या विद्यालय- प्रबन्धन- समित्याः सहयोगेन च विद्यार्थिनां नियमितोपस्थितिं प्रोत्साहितवती। अष्टमकक्षायाः सर्वान् विद्यार्थिनः उत्तीर्णान् कारयित्वा नवमकक्षायां प्रवेशं प्राप्तुं समर्थान् अकरोत्। अपि च विद्यार्थिभिः राष्ट्रिय- मेधावृत्ति- प्रतिभान्वेषणपरीक्षायां (एनएमएमएस), विविधासु विज्ञानप्रतियोगितासु सफलताः प्राप्ताः।

शिक्षाक्षेत्रे उत्कृष्टयोगदानस्य, नवाचारस्य, विद्यार्थिनाम् उल्लेखनीयलब्धीनां च कृते, उषासिंहाय वर्ष २०२५ तमस्य राज्य- शिक्षक- पुरस्कारः प्रदत्तः।

उत्तरप्रदेशस्य मूलभूतशिक्षाविभागः समर्पितानां शिक्षकाणां नवाचारात्मकप्रयासान् प्रोत्साहयन् गुणवत्तापूर्णायाः समावेशिन्याश्च शिक्षायाः सङ्कल्पं साकारं कर्तुं निरन्तरं प्रयत्नशीलः अस्ति।

माहूरगढस्य दिव्यतीर्थयात्रा- शक्तेः, तपस्यायाः, गुरुतत्त्वस्य च पवित्रः सङ्गमः- विदुषी अग्रवालः



महाराष्ट्रराज्यस्य नान्देडमण्डले स्थितः माहूरगढे सनातनधर्मस्य अत्यन्तं पवित्रेषु तीर्थस्थलेषु श्रीरेणुकामातुः मन्दिरं एकपञ्चाशत् शक्तिपीठेषु अन्यतमं मन्यते।

पौराणिकी मान्यता अस्ति यत् अत्र सतीदेव्याः अङ्गं पतितम् आसीत्। श्रीरेणुकामाता आदिशक्तिरूपेण, जगदम्बारूपेण, भगवान् परशुरामस्य जननीरूपेण च पूज्यते। मातुः पावनसन्निधौ दर्शनं मातृशक्तेः, श्रद्धायाः, दिव्यत्वस्य च अनुपमम् अनुभवं प्रददाति।

भगवतः परशुरामस्य मन्दिरम्-

भगवान् परशुरामः भगवन् विष्णोः षष्ठः अवतारः इति मन्यते। सः महर्षेः जमदग्नेः तथा मातुः रेणुकायाः पुत्रः आसीत्। तस्य जीवनं तपस्यायाः, शौर्यस्य, धर्मरक्षणस्य, गुरुभक्तेश्च अद्भुतः सङ्गमः अस्ति। भगवतः शिवात् तेन दिव्यः परशुः प्राप्तः, अतः सः परशुरामः इति नाम्ना प्रसिद्धः अभवत्। सः सप्तसु चिरञ्जीविषु अन्यतमः अपि मन्यते, ये अद्यापि पृथिव्यां विद्यमानाः सन्ति इति धार्मिकः विश्वासः अस्ति।

मातुः अनुसूयायाः मन्दिरम्-

माता अनुसूया महर्षेः अत्रेः धर्मपत्नी आसीत्। सा सनातनपरम्परायां पतिव्रता, तपस्विनी तथा पूजनीया मातृशक्तिः इति प्रसिद्धा अस्ति। तस्याः तपस्यायाः, पवित्रतायाः, पतिव्रतधर्मस्य च महिमा त्रिषु लोकेषु विख्याता मन्यते।

पौराणिककथानुसारं ब्रह्मा, विष्णुः, महेशश्च तस्याः पतिव्रतशक्तेः परीक्षार्थं साधूनां वेषं धृत्वा आगतवन्तः। माता अनुसूया स्वस्य तपोबलेन त्रिदेवान् बालरूपे परिवर्तनं कृतवती। तस्याः भक्त्या तपस्यया च प्रसन्नाः त्रिदेवाः तस्याः पुत्ररूपेण अवतरणस्य वरदानम् अददुः। माता अनुसूयायाः जीवनं नारीशक्तेः, त्यागस्य, करुणायाः, अटूटनिष्ठायाश्च प्रतीकम् अस्ति।

भगवान् दत्तात्रेयस्य मन्दिरम्-

भगवान् दत्तात्रेयः ब्रह्मा-विष्णु-महेशानां संयुक्तस्वरूपः, अर्थात् त्रिदेवस्य अवतारः इति पूज्यते। सः महर्षेः अत्रेः तथा मातुः अनुसूयायाः पुत्रः अस्ति। भगवान् दत्तात्रेयः सनातनपरम्परायाम् आदिगुरुः तथा अवधूतपरम्परायाः महान् आचार्यः इति मान्यते। तस्य समीपे दृश्यमानाः चत्वारः श्वानाः चतुर्णां वेदानां प्रतीकाः मन्यन्ते तथा तस्य समीपस्था गौः पृथिव्याः पोषणस्य च प्रतीकरूपेण पूज्यते। भगवान् दत्तात्रेयस्य उपदेशाः अस्मान् शिक्षयन्ति यत् सम्पूर्णा सृष्टिः एव ज्ञानस्य स्रोतः अस्ति तथा जीवनस्य प्रत्येकस्मात् अनुभवादपि किञ्चित् शिक्षितुं शक्यते।

महर्षेः अत्रेः मन्दिरम्-

सप्तर्षिषु प्रतिष्ठितः महर्षिः अत्रिः ब्रह्मणः मानसपुत्रेषु अन्यतमः मन्यते। सः महान् तपस्वी, वेदज्ञः ऋषिः तथा वैदिकमन्त्राणां दृष्टा आसीत्। तस्य पत्नी माता अनुसूया आसीत् तथा तस्य पुत्राः भगवान् दत्तात्रेयः, दुर्वासाः ऋषिः तथा चन्द्रदेवः इति पुराणेषु वर्णितम् अस्ति। ऋग्वेदे अत्रिऋषेः तथा तस्य वंशस्य ऋषीणां विशेषं योगदानम् अस्ति।

तीर्थयात्रायाः आध्यात्मिकानुभूतिः-

माहूरगढस्य एषा यात्रा मम कृते केवलं पञ्चमन्दिराणां दर्शनपर्यन्तं सीमिता न आसीत्, अपि तु आदिशक्तेः, विष्णोः अवतारस्य, त्रिदेवस्य, ऋषिपरम्परायाः तथा तपस्विन्याः मातृशक्तेः दर्शनानां अद्भुतः सङ्गमः आसीत्। एकस्मिन् एव पवित्रे स्थले श्रीरेणुकामातुः मातृत्वस्य, भगवान् परशुरामस्य शौर्यस्य, माता अनुसूयायाः पतिव्रतधर्मस्य, महर्षेः अत्रेः ब्रह्मज्ञानस्य, भगवान् दत्तात्रेयस्य गुरुतत्त्वस्य अनुभूतिः मम कृते अत्यन्तं सौभाग्यस्य अविस्मरणीयस्य च आध्यात्मिकानुभवस्य विषयः अभवत्।

एषा यात्रा मम जीवनस्य एकः पावनः, दिव्यः, चिरस्मरणीयः च आध्यात्मिकानुभवः अस्ति।

सोनपुरहरिहर-क्षेत्रसमीक्षा

(एकं प्रसिद्धं धार्मिकं सांस्कृतिकं च पर्यटनस्थलम्)

- डॉ विमलेश झा,

डीएवी पब्लिक स्कूल बरारी,
भागलपुर, बिहार -८१२००३

भारतवर्षे अनेकेषु पवित्रेषु तीर्थस्थलेषु बिहारप्रदेशस्य सोनपुरस्थितं हरिहरक्षेत्रं विशिष्टं महत्त्वं धारयति। एतत् क्षेत्रं धार्मिकदृष्ट्या, सांस्कृतिकदृष्ट्या, ऐतिहासिकदृष्ट्या च अत्यन्तं प्रसिद्धम् अस्ति। गङ्गायाः गण्डक्याश्च पवित्रयोः नद्योः सङ्गमस्य समीपे स्थितमिदं क्षेत्रं श्रद्धालूनां पर्यटकानां च प्रमुखम् आकर्षणकेन्द्रम् अस्ति। प्रतिवर्षम् अत्र विशालस्य मेलायाः आयोजनं भवति। अयं मेला सोनपुरमेला अथवा हरिहरक्षेत्रमेला इति नाम्ना प्रसिद्धः अस्ति।

हरिहरक्षेत्रस्य नाम्नः पृष्ठतः धार्मिकः विशेषः अर्थः अस्ति। हरिः इति भगवान् विष्णुः तथा हरः इति भगवान् शिवः। उभयोः देवयोः संयुक्तोपासनायाः प्रतीकरूपेण अस्य क्षेत्रस्य नाम हरिहरक्षेत्रम् इति प्रसिद्धम् अभवत्। अत्र स्थितः प्रसिद्धः हरिहरनाथमन्दिरः श्रद्धालूनां प्रमुखम् आस्थाकेन्द्रम् अस्ति।

पौराणिकमान्यतानुसारम् इदं क्षेत्रं प्राचीनकालादेव धार्मिकगतिविधीनां केन्द्रम् आसीत्। अत्र भगवान् विष्णोः शिवस्य च आराधना विशेषरूपेण क्रियते। मन्दिरे प्रतिदिनं भक्ताः समागत्य पूजां, अर्चनां, जलाभिषेकं च कुर्वन्ति। कार्तिकमासे अत्र श्रद्धालूनां विशेषः सम्मर्दः दृश्यते।



गजग्राहयोः पौराणिकी कथा

हरिहरक्षेत्रस्य प्रसिद्धिः गजग्राहयोः पौराणिककथया अपि सम्बद्धा अस्ति। पुराणेषु वर्णितानुसारं गजेन्द्रनामकः महान् गजः एकदा सरोवरे जलं पातुं गतवान्। तदा एकः ग्राहः तस्य पादं गृहीतवान्। गजः बहुकालं यावत् ग्राहेण सह संघर्षम् अकरोत्। किन्तु सः स्वात्मानं रक्षितुं न अशक्नोत्।

अन्ते निरुपायः सः भगवान् विष्णुं स्मृतवान् तथा भक्तिपूर्वकं प्रार्थनाम् अकरोत्। भक्तवत्सलः भगवान् विष्णुः तस्य आर्तनादं श्रुत्वा गरुडमारुह्य तत्र आगतवान्। ततः सुदर्शनचक्रेण ग्राहस्य वधं कृत्वा गजेन्द्रस्य रक्षणम् अकरोत्। एषा कथा गजेन्द्रमोक्षनाम्ना प्रसिद्धा अस्ति। अस्याः कथायाः सम्बन्धः हरिहरक्षेत्रस्य धार्मिकमहत्त्वेन सह लोकमान्यतासु दृश्यते।

सोनपुरमेला भारतस्य प्राचीनतमेषु विशालतमेषु च मेलासु अन्यतमः अस्ति। अस्य मेलायाः इतिहासः अतीव प्राचीनः मन्यते। प्राचीनकाले अयं मेला व्यापारस्य, पशुविक्रयस्य, सांस्कृतिकसमागमस्य च प्रमुखं केन्द्रम् आसीत्। अत्र देशस्य विभिन्नेभ्यः प्रदेशेभ्यः व्यवसायिनः, कृषकाः, पशुपालकाः, साधवः, सन्तः तथा सामान्यजनाः आगच्छन्ति स्म।विशेषतः गजाना।, अश्वानां, गोवृषाणां तथा अन्येषां पशूनां क्रयविक्रयार्थम् अयं मेला प्रसिद्धः आसीत्। कालान्तरे पशुव्यापारस्य स्वरूपे परिवर्तनम् अभवत्, तथापि मेलायाः सांस्कृतिकं धार्मिकं च महत्त्वम् अद्यापि अक्षुण्णम् अस्ति।

कार्तिकपूर्णिमायाः स्नानम्

कार्तिकपूर्णिमा हरिहरक्षेत्रस्य सर्वाधिकमहत्त्वपूर्णेषु पर्वसु अन्यतमा अस्ति। अस्यां तिथौ लक्षशः श्रद्धालवः गङ्गा-गण्डकीयोः पवित्रसङ्गमे स्नानं कुर्वन्ति। प्रातःकालादेव नदीतीरे भक्तानां विशालः समुदायः समागच्छति। जनाः पवित्रस्नानं कृत्वा भगवान् हरिहरनाथस्य दर्शनं पूजनं च कुर्वन्ति। धार्मिकविश्वासानुसारं कार्तिकपूर्णिमायां पवित्रनदीषु स्नानं कृत्वा दानं, जपं, तपः, पूजनं च कर्तुं विशेषं पुण्यं प्राप्यते। अतः देशस्य विभिन्नेभ्यः भागेभ्यः श्रद्धालवः अत्र आगच्छन्ति। सोनपुरमेला केवलं धार्मिकसमागमः नास्ति, अपि तु बिहारस्य समृद्धायाः लोकसंस्कृतेः जीवन्तं प्रतीकम् अपि अस्ति। अत्र लोकगीतानां, लोकनृत्यानां, नाट्यप्रदर्शनानां तथा विविध- सांस्कृतिक-कार्यक्रमाणाम् आयोजनं भवति। ग्रामीणजीवनस्य परम्पराः, हस्तशिल्पानि, स्थानीयव्यञ्जनानि, पारम्परिककलाः अत्र विशेषतया आकर्षणस्य केन्द्राणि भवन्ति।

मेलायां विविधाः आपणाः दृश्यन्ते। वस्त्राणि, आभूषणानि, मृण्मयपात्राणि, काष्ठनिर्मितानि वस्तूनि, क्रीडनकानि तथा गृहसज्जायाः सामग्र्यः विक्रयार्थं प्रदर्श्यन्ते। बालकानां मनोरञ्जनाय विविधाः क्रीडनकानि, झूलाः, मनोरञ्जनसाधनानि च भवन्ति। वर्तमानकाले सोनपुरमेला आधुनिक-सुविधाभिः समृद्धः भवति। आगन्तुकानां सुविधायै निवासव्यवस्था, स्वच्छताव्यवस्था, पेयजलव्यवस्था, चिकित्सासेवा, सुरक्षाव्यवस्था, यातायात- व्यवस्था च आयोज्यन्ते। पर्यटकानां कृते आकर्षकाणि स्विस-कॉटेज-नामकानि निवासस्थानानि अपि निर्मीयन्ते।

पटना-नगरात् सोनपुरं प्रति पर्यटकानां कृते विशेषयानव्यवस्था तथा भ्रमणव्यवथा अपि उपलब्धाः भवन्ति। एतेन पर्यटनव्यवसायस्य





विकासः भवति, स्थानीयजनानां कृते जीविकोपार्जनस्य नूतनाः अवसराः सृज्यन्ते। सोनपुरमेला स्थानीय-अर्थव्यवस्थायाः विकासे महत्त्वपूर्णां भूमिकां निर्वहति। अनेके लघुव्यापारिणः, शिल्पकाराः, कृषकाः, वाहनचालकाः, भोजनालयसञ्चालकाः तथा अन्ये व्यवसायिनः अस्मात् मेलात् आर्थिकलाभं प्राप्नुवन्ति। मेलायाम् आगतानां पर्यटकानां कारणेन परिवहनक्षेत्रे, आवासक्षेत्रे, खाद्यव्यवसाये तथा अन्येषु क्षेत्रेषु व्यापारस्य वृद्धिः भवति।

अस्य मेलायाः धार्मिकं सांस्कृतिकं च महत्त्वं संरक्षितुं पर्यावरणस्य संरक्षणम् अपि आवश्यकम् अस्ति। गङ्गा-गण्डकीनद्योः स्वच्छता, प्लास्टिक-वस्तूनां न्यूनोपयोगः, अपशिष्टपदार्थानां समुचितव्यवस्था वृक्षारोपणम् इत्यादयः कार्याः सर्वैः करणीयाः। प्रशासनस्य, स्थानीयजनानां तथा पर्यटकानां संयुक्तप्रयत्नेन एव अस्य पवित्रक्षेत्रस्य प्राकृतिकसौन्दर्यं सुरक्षितं भवितुं शक्नोति।

सोनपुरस्य हरिहरक्षेत्रं केवलं धार्मिकतीर्थस्थलम् एव नास्ति, अपि तु भारतीयसंस्कृतेः, परम्परायाः, सामाजिकैकतायाः तथा लोकजीवनस्य अद्भुतं प्रतीकम् अस्ति। अत्र धर्मः, इतिहासः, व्यवसायः, कला, संस्कृति तथा पर्यटनम् एकत्र मिलन्ति। सोनपुरमेला भारतस्य विविधतायां निहितायाः एकतायाः सुन्दरं उदाहरणम् अस्ति।

अतः अस्माभिः अस्य ऐतिहासिकस्य धार्मिकस्य सांस्कृतिकस्य च धरोहरस्य संरक्षणाय निरन्तरं प्रयत्नः करणीयः। हरिहरक्षेत्रस्य महिमा सर्वत्र प्रसरेत्, भारतीयसंस्कृतेः गौरवं च विश्वे प्रतिष्ठितं भवेत्- एषा एव अस्माकं कामना। अन्ते च-

ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम्।
पुरुषायादिबीजाय परेशायाभिधीमहि॥२॥

जयतु हरिहरक्षेत्रम्! जयतु भारतीयसंस्कृतिः!



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

व्याकरणचिन्तनम् -१६

अव्ययपदस्य परिचयः -
सूत्रम् - "स्वरादिनिपातमव्ययम्" - पाणिनिः।
सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम्॥
अर्थः -
यत् पदं लिङ्ग-विभक्ति-वचनेषु न परिवर्तते, न व्येति, न चलति वा, तत् अव्ययम्।
गोपालः - गोपालौ - गोपालाः, --- इत्यादीनि अन्यशब्दानां रूपाणि सम्भवन्ति, परन्तु 'एव' इति अव्ययं - सर्वदा 'एव' इति रूपेण हि तिष्ठति, अस्य रूपस्य परिवर्तनं न कदापि सम्भवति।
अव्ययम् = न + व्ययम् = अस्य व्ययः, विकारः वा नास्ति।
अव्ययपदानां सङ्ख्या सुनिश्चिता नास्ति, बहुधा भवितुमर्हति।
अव्ययानां पञ्च भेदाः -
१. उपसर्गः - प्र, परा, अप, सम्, अनु, अव, निस्, ---
२. निपातः - च, वा, एव, अपि, तु, हि, खलु, ---
३. काल-वाचकः - अद्य, श्वः, ह्यः, यदा, तदा, कदा, सर्वदा, ---
४. स्थान-वाचकः - अत्र, तत्र, कुत्र, सर्वत्र, उभयत्र, अन्यत्र ---
५. प्रकार-वाचकः - यथा, तथा, एवम्, इति, इव, तथा, ---
अभ्यासाय कानिचन अव्ययप्रयुक्तानि वाक्योदाहरणानि प्रस्तूयन्ते -
च - सीतया सह रामः, लक्ष्मणः च वनं गतवन्तौ ।
वा - भवान् पठतु वा कार्यं करोतु ।
एव - केशवः एव आगतः, न रामः।
अपि - भवान् अपि आगच्छतु।
तु - हरिः तु न आगतः।
हि - सत्यवचनं हि सार्थकं भवति।
खलु - सः खलु गायकः।
ननु - ननु त्वं वृन्दावनं गच्छसि ?
नूनम् - नूनं सः आगमिष्यति।
इति - 'अहं सम्यक् पठामि' इति सः छात्रः उक्तवान् ।
इव - भवतः मुखं चन्द्रः इव शोभते।
यथा - यथा पिता तथा पुत्रः।
तथा - यथा गुरुः तथा शिष्यः।
एवम् - एवं कार्यं कुरु।
अत्र - अत्र बहवः छात्राः सन्ति।
तत्र - तत्र अस्माकं गुरुः अस्ति।
कुत्र - त्वं कुत्र गच्छसि ?
सर्वत्र - ईश्वरः सर्वत्र अस्ति।
उभयत्र - सः उभयत्र पटुः।
अन्यत्र - अन्यत्र मा गच्छ।
यत्र - यत्र धर्मः तत्र जयः।
अधः - पुस्तकम् अधः अस्ति।
उपरि - पक्षी उपरि उड्डयते।
पुरः - मन्त्री पुरः तिष्ठति।
पश्चात् - सः पश्चात् आगच्छत्।
सह - भवान् मया सह चलतु।
विना - विद्यां विना जीवनं व्यर्थम्।
अद्य - अद्य मम कार्यदायित्वम् अस्ति।
श्वः - श्वः छात्राणां परीक्षा अस्ति।
ह्यः - ह्यः अहं गृहे नासम्।
परश्वः - परश्वः उत्सवः अस्ति।
परह्यः - परह्यः सोमवासरः आसीत्।
यदा - यदा सूर्यः उदेति तदा अन्धकारः निर्गच्छति।
तदा - यदा त्वं सम्यक् पठिष्यसि तदा सुविज्ञः भविष्यसि।
कदा - भवान् पुनः कदा आगमिष्यति ?
सर्वदा - सर्वदा सत्कार्यं कुरु ।
कदापि - कदापि असत्यं मा वद।
अधुना - अधुना अहं गुवाहाटीं गच्छामि।
इदानीम् - इदानीं मम पूजा-समयः।
कुतः - भवान् सद्यः कुतः आगतः?
यतः - यतः धर्मः ततः जयः।
ततः - ततः सः गृहं प्रत्यागतवान्।
अतः - मम जीवनलक्ष्यं महदस्ति, अतः अहं सम्यक् पठामि।
अहो - अहो! सुन्दरं सागरदृश्यम्। हा - हा! दुर्गतिः।
धिक् - धिक् मूर्खम्।
नमः - भवद्भ्यः सर्वेभ्यः नमः।
स्वाहा - अग्नये स्वाहा।
अलम् - अलम् अधिकजल्पनेन।
--- इत्यादीनि ।
एवमेव क्त्वान्तानि, ल्यबन्तानि, तुमुन्तानि पदानि अपि अव्ययानि एव। यथा -
क्त्वा - गत्वा, खादित्वा, पठित्वा, ---
ल्यप् - आगम्य, प्रणम्य, प्रपठ्य,
तुमुन् - गन्तुम्, पठितुम्, कर्तुम् -स्मरणीयम् -
अव्ययस्य विभक्तिः न भवति, लिङ्गं न भवति, वचनं न भवति। अर्थात् अव्ययस्य न कोऽपि विकारः भवति
अव्ययम् इत्युक्ते अविकारि पदम् इति।
च, वा, एव, अपि, अत्र, तत्र, अद्य, श्वः, यदा, तदा - इत्यादिकं सर्वम् अव्ययपदम् इति।



वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य वयं काश्चन विचित्राः वार्ताः पश्यामः। प्रथमा वार्ता तन्त्रज्ञान-जगतः अस्ति। मया श्रुतं यत् एप्पल-संस्थया स्वायत्तानां सङ्गणक-सहायकानां निर्माणम् आरब्धम्। एते सहायकाः मानवेन विना अपि स्वयम् उपकरणानि चालयन्ति, लेखान् लिखन्ति, जालपुटानि च पठन्ति। परन्तु सुरक्षायाः कारणेन अन्येषां सहायकानां मार्गः संस्थया कठिनः कृतः इति अपि प्रकाशितम्। काव्या- अहो! एतत् तन्त्रज्ञानं तु अतीव अद्भुतम् अस्ति। किन्तु स्वचालितानां सहायकानां विषये गोपनीयतायाः चिन्ता अपि जायते। अधुना भारतस्य एका विचित्रा घटना मया पठिता। उत्तरप्रदेशस्य सहारनपुर-नगरे सर्वोच्चन्यायाधीशस्य स्वागताय आरक्षकाः स्थिताः। परन्तु न्यायाधीशः तदा न आगतः। तस्य स्थाने सांसदः असदुद्दीन-ओवैसीः तत्र आगतः। आरक्षकैः सः एव न्यायाधीशः इति मत्वा तस्मै राजकीय-अभिवादनं दत्तम्! तेन अपि तत् अभिवादनं सविनयं स्वीकृतम्।
नन्दिनी- हन्त! एषः राजकीय-प्रमादः तु अतिहास्यकरः जातः। अपरं च, उत्तरप्रदेशात् एव अन्यत् विचित्रं वृत्तं मया श्रुतम्। सीतापुर-नगरे एका महिला आरक्षकालयं गता। तया पत्या प्रियेण च सह एकत्र वासः इष्टः। एतदर्थं तया एकं कार्य-समयावलि-पत्रम् अपि लिखितम्। दिनस्य समयः एकस्मै, रात्रेः समयः अपरस्मै इति तस्मिन् पत्रे तया निर्दिष्टम्। तया आरक्षक-अधिकारी तत् पत्रं दर्शितः, अनुमतिः च प्रार्थिता। परन्तु एतत् श्रुत्वा आरक्षकाः अतीव विस्मिताः, तैः सा प्रार्थना अस्वीकृता च।
काव्या- अये! कीदृशः अयं लोक-व्यवहारः! आरक्षकैः सम्यक् विचार्य उचितः निर्णयः कृतः। अधुना अहम् एकां चीनदेशस्य हास्यकरीं वार्तां कथयामि। तत्र एकस्मिन् विद्युत्-वाहने स्वचालित- स्थापनतन्त्रं योजितम्। तत् वाहनं रिक्त-स्थानं प्रवेष्टुं प्रवृत्तम्। परन्तु तस्य सङ्गणके कश्चित् दोषः जातः। अतः तेन वाहनेन एकस्मिन् एव स्थाने अष्टषष्टुत्तर- अष्टशत-कृत्वः (८६८-कृत्वः) स्थापनस्य प्रयत्नः कृतः। एतत् विचित्रं दृश्यं जनैः दृष्टं, चलच्चित्रं च गृहीतम्।
नन्दिनी- अतिरोचिका इयं वार्ता! कदाचित् यन्त्राणि अपि मानवाः इव विचित्रं व्यवहारं कुर्वन्ति। काव्ये, अद्य तव साहाय्येन एताः सर्वाः विचित्राः वार्ताः श्रोतृभ्यः प्रस्तुताः। एतदर्थं कृतज्ञताम् अर्पयामि तुभ्यम्।
काव्या- नन्दिनि, सत्यम् उक्तं त्वया। अद्य मानवानां यन्त्राणां च विलक्षणानि कर्माणि अस्माभिः दृष्टानि। अस्मिन् कार्यक्रमे मम आमन्त्रणेन अहम् अपि कृतज्ञताम् अर्पयामि तुभ्यम्। पुनर्मेलिष्यामः!

हिमसंस्कृतवार्ताः, ईदरधीरजः



विनोदकणिका

{१} मातृगृहतः भार्यायाः दूरवाणी आगता, रक्षाबन्धनं समाप्तम्, अधुना माम् उद्धृत्य आगच्छ। पतिः- प्रिये! १५ अगस्तपर्यन्तम् अवकाशः अस्ति तर्हि द्वौ वा चत्वारि दिनानि इतोऽपि मातृगृहं तिष्ठतु।
भार्याः- चतुरः मा भवतु! देशः स्वतन्त्रः अभवत्, न त्वम्।
{२}
औषधविक्रेता क्रुद्धः भूत्वा अवदत्- अग्रिमे समये भवान् अवसादस्य औषधं क्रेतुम् इच्छति तर्हि वैद्यस्य चिटिकाम् आनयतु। न तु विवाहप्रमाणपत्रम्।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्©®